श्रीगणेशाय नमः ॥ शुभं भवतु ॥ नन्वीश्वरेच्छारूपस्य वाच्यत्वस्य गुणत्वादि समवायित्वात् समवायित्वं तद्धर्माधिकरणधर्मो नित्यत आ न्य १
ह वाच्यत्वमिति ॥ अस्माच्छब्दादयमर्थो बोद्धव्य इतीश्वरेच्छारूपं× विषयत्व×पदार्थांतरं वा वाच्यत्वं न तु तादृशेच्छामात्रम
तिप्रसक्तत्वान्नञ्चनकस्यापि समवाय इति भावः ॥ समवायितयेति मूलस्य समवायिकारणतयेत्यर्थ इत्यप्याहुः ॥ नन्विदं वाच्यं
ज्ञेयत्वादित्यादौ समवायितया वाच्यत्वाभावरूपस्य साध्याभावस्य प्रसिद्धावपि प्रमेयवान्वाच्यत्वादित्यादौ केवलान्वयि
नि तदप्रसिद्धेरनुपधारान्मूलस्य न्यूनत्वमतः स्वयमाह प्रमेयेति ॥ भावत्वेनेति भावत्वेनाभावानामभावः सर्वत्र सुलभ इत्य
न्वयः ॥ ननु भावत्वेनाभावो नास्तीति प्रतीतिः अभावस्यैव अभावत्वेन भावो नास्तीति प्रतीतिः भावस्यैव प्रतियोगित्वमवगा
हते न चैतावता प्रमेयमात्रप्रतियोगिकाभावप्रसिद्धिरत आह ॥ वह्नित्वेनेति ॥ वह्नित्वेन निर्वह्नौ सर्वेषामभावः सुलभ

इतियोजना॥ननुजलेवह्नित्वेनप्रमेयंनास्तीतिप्रतीतिर्वह्निमात्रप्रतियोगिकाभावमेवावगाहतेनतुप्रमेयसामान्यप्रतियो ता
गिताकं वह्निमतितादृशप्रतीत्यनुदयात्वह्निप्रतियोगिताकाभावावगाहित्वस्यावश्यकत्वादतआह॥आवृत्ती
ति॥तथाचगगनत्वेनप्रमेयंनास्तीतिप्रतीत्यैवप्रमेयसामान्यप्रतियोगिकाभावप्रसिद्धिः॥नहितत्रापिगगन[illegible]
मात्रप्रतियोगिकत्वंभासतइतिशक्यतेवक्तुंविनिगमकाभावेनप्रमेयमात्रप्रतियोगिकत्वावगाहनेबाध
काभावात्कालिकसंबंधेनगगनत्वादिविशिष्टस्यप्रमेयस्यसर्वत्रनाभावःसंभवतीत्यतउक्तंआवृत्तिमात्र
वर्तीति॥तथाचयादृशेनसंबंधेनगगनत्वादेरवृत्तिमात्रवृत्तित्वंतादृशसंबंधावच्छिन्नप्रतियोगितावच्छेदकता
कोगगनत्वादिनाप्रमेयसामान्याभावोवाच्यइतिभावः॥ननुकालिकसंबंधेनप्रमेयसाध्यकेतेनैवसंबंधेन
साध्याभावस्यैवप्रसिद्धिःकार्यासाचकालिकसंबंधेनगगनत्वेनप्रमेयंनास्तीतिप्रतीत्यानसंभवतितत्सं

बंधेन गगनादेर्वृत्तिमत्त्वमेतादृशप्रतीतेर्गगनप्रतियोगितावगाहित्वेप्युपपत्तौ प्रमेयांतरप्रतियोगिकत्वेमाना
भावादाहविरुद्धेति ।। तथा च घटत्वपटत्वाभ्यां प्रमेयं नास्तीति प्रतीत्या विनिगमकाभावेन निखिलप्रमेयप्रतियोगिकस्त
त्राप्यभावः प्रसिद्ध इति भावः इदमुपलक्षणं संयोगादिसंबंधेन घटत्वादिकमपि प्रमेयावृत्तीति तत्संबंधेन घटत्वाव
च्छिन्नप्रतियोगिताकच्छेदकताकप्रमेयसामान्याभावोपि बोध्यः ।। अप्रसिद्धिदोषस्यैव सत्त्वान्मूले प्रतियोग्यवृत्ती
त्यादिदोषांतराकिमित्यपानमतस्तदवतारार्थमाशंकते ।। नन्विति ।। पारिभाषिकमेवेत्येवकारेण न व्यभिचा
रो अव्यभिचार इति यौगिकार्थो व्यवच्छिद्यते ।। अव्यभिचरितत्वमिति ।। अथेदं वाच्यमित्यादिग्रंथाभिप्रेतमुक्तिदोषः
तथा च नन्वेवं घटत्वेत्यादिमूलस्य केवलान्वयिनो व्यभिचारित्वेनालक्ष्यताप्रदर्शनपरत्वान्न पूर्वमूलासं

गतिरिति ध्येयं ॥ यदीत्यादि ॥ अत्र यत्समानाधिकरणा इत्यनुक्त्वा साध्यव्यापकतावच्छेदकप्रतियोगिताकस्यात्मत्वसा
मान्याभावस्यापि यावदंतर्गतत्वात्तस्य च व्यापकताघटकसमवायसंबंधेन प्रतियोग्यधिकरणे केनापि संबंधेन अवृत्ति
त्वादयमात्माज्ञानादित्यादावव्याप्त्यापत्तिरतस्तदुपात्तमित्यग्रे स्पष्टीभविष्यति ॥ न चात्मत्वाद्यभावेऽपि समानकालीन
त्वादिसंबंधेन प्रतियोग्यधिकरणवृत्तिः तथाविधसंबंधानां वृत्त्यनियामकत्वात् क्वचिदपि तेन संबंधेन वृत्तिमत्त्वाप्रती
तेः ॥ इत्थं च हेतुसमानाधिकरणत्वमपि हेतुतावच्छेदकसंबंधेन हेत्वधिकरणाधेयत्वं ग्राह्यं ॥ तेनात्मत्वाद्यभावस्यापि हेत्वधि
करणसंबंधित्वान्नोक्तदोषतादवस्थ्यं ॥ न च हेतुसमानाधिकरणत्वमपहाय साध्यसमानाधिकरणा यावंतस्तादृशा
भावाः स्वविशिष्टयद्धर्मावच्छिन्नहेत्वधिकरणावच्छेदेन प्रतियोगिसमानाधिकरणास्तद्धर्मवत्त्वमित्येव कुतो न कृत
मिति वाच्यं ॥ द्रव्यं आत्मत्वादित्यादौ महाकाले साध्यसमानाधिकरणस्य द्रव्यत्वादिसामान्याभावस्य स्वविशिष्ट

२

हेत्वधिकरणाप्रसिध्यातत्राव्याप्तिप्रसंगात्।यत्तु यत्समानाधिकरणायावंतस्तादृशाभावाः साध्यसमानाधिकरणास्तत्त्व
मित्येवलक्षणमस्तु स्वस्वप्रतियोगिसामानाधिकरण्यप्रवेशोबीजाभाव इति तत्तुच्छं।।तथासति यत्समानाधिकरणाःया
वंतोऽभावाः साध्यसमानाधिकरणास्तत्त्वमित्यस्यैव सम्यक्त्वे साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताका
इत्यस्य वैयर्थ्यापत्तेः। तन्मात्रोक्तौ विनापि व्यधिकरणधर्मावच्छिन्नाभावं लक्षणसंभवे प्रतियोग्यवृत्तित्वेत्यादिग्रंथाव
तारकत्वानुपपत्तेः।यदपि यत्समानाधिकरणाः साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकायावंतोऽभा
वाः दैशिकविशेषणतयोभयवृत्तयस्तत्त्वमित्येवास्तु लक्षणं स्वस्वप्रतियोगिसामानाधिकरण्यांतर्भावे गौरवात् हेतु
समानाधिकरणस्य तत्तद्योगोद्भकान्यत्वाभावस्यैव दैशिकविशेषणतयोभयवृत्तित्वाभावात् धूमवान्वह्नेरित्यादाव

तिव्याप्तिविरहादितिं तन्मंदं॥ हेतुसमानाधिकरणस्यवह्निसंयोगाद्यात्मकाभावस्यदैशिकविशेषणतयोभयवृत्तित्वविरहाद्व
ह्निमान्धूमादित्यादावव्याप्तिप्रसंगात्॥ नचभावभिन्नस्यैवहेतुसमानाधिकरणाभावस्यप्रवेशान्नैषदोषइतिवाच्यं॥ तद्भिन्नंघट
त्वादित्यादावतिव्याप्त्यापत्तेः॥ तद्घटभिन्नत्वाद्यभावस्यतद्घटीयरूपरसाद्यात्मकत्वेनभावत्वात्पटत्वादिनातद्घटभिन्नत्वाद्यभावस्य
चोभयवृत्तित्वादितिपल्लंप[illegible]पतन॥ अत्रचयत्संदंयद्धर्मावच्छिन्नपरमिमंचनत्वमित्यस्यहेतुतावच्छेदकीभूततद्धर्मवत्त्वमित्येवार्थः
तेनसकलधूमव्यक्तिष्वनुगतायावह्निव्याप्तेर्नालाभः॥ नवाज्ञानवान्मनोन्यत्वेसत्यात्ममनःसंयोगादित्यादौमनसिहेतुसमाना
धिकरणस्यात्मत्वाद्यभावस्यस्वविशिष्टहेतुतावच्छेदकावच्छिन्नहेत्वधिकरणाप्रसिद्धिनिबंधनाव्याप्तिः॥ यत्तुद्रव्यंगुणकर्मान्यत्वे
सतिसत्त्वादित्यादौहेतुसमानाधिकरणाद्रव्यत्वाद्यभावस्यातथात्वादव्याप्तिः॥ अतोयत्संदंयधर्मावच्छिन्नपरमितितन्न॥

द्रव्यत्वाद्यभावस्यापिकालिकादिसंबंधेनस्वविशिष्टयद्धेतुतावच्छेदकावच्छिन्नहेत्वधिकरणंजन्यद्रव्यादितदवच्छेदेनप्रतियोगिसा छे
मानाधिकरण्यात्तत्राव्याप्तिविरहात्॥ साध्येत्यादि॥ साध्यतावच्छेदकावच्छिन्नंवह्निनिष्ठाभावप्रतियोगितानवच्छेदिकायदभा
वप्रतियोगिता तादृशाभावइत्यर्थः॥ अत्रचविशिष्टसत्तावान्जातेरित्यादौविशिष्टसत्ताद्यवच्छिन्नाभावस्यैवसत्तारू नो ३
पसाध्यव्यापकतावच्छेदकप्रतियोगिताकतयातस्यस्वविशिष्टहेत्वधिकरणावच्छेदेनप्रतियोगिसामानाधिकर
ण्यादतिव्याप्तिरतःसाध्यतावच्छेदकावच्छिन्नेति॥ तथाचद्रव्यत्वाद्यभावस्यैवनिरुक्तयावदन्तर्गतस्यात्तथात्वान्नाति
प्रसंगः॥ साध्यवत्त्वंचात्रसाध्यतावच्छेदकसंबंधेनग्राह्यं॥ तेनवस्तुमात्रस्यैवविषयितासंबंधेनज्ञानवत्त्वाद्धेतुत्वा
दिनावाच्यत्वाद्यभावस्यैवसाध्यव्यापकतावच्छेदकप्रतियोगिताकत्वेपिसमवायेनज्ञानस्यसाध्यत्वेद्रव्यत्वादिहे

त्तेनातिव्याप्तिः॥ समवायसंबंधावछिन्नसत्तानवह्निष्ठाभावप्रतियोगितानवछेदकप्रतियोगिताकस्यात्मत्वाद्यभावस्यैव
प्रतियोग्यसमानाधिकरणत्वात्॥ अत्रच साध्यवह्निष्ठाभावः प्रतियोगिव्यधिकरणत्वेनैव निवेश्यः॥ तेन साध्यवन्मा
त्र एव समवायित्वावछिन्नवाच्यत्वाद्यभावप्रतियोगित्वेन घटाद्यभावसत्वेपि साध्यवह्निष्ठाभावप्रतियोगितानवछेदक क
प्रतियोगिताकाभावस्याप्रसिद्धिः॥ इत्थंच तत्संबंधेन स्वावछिन्नानधिकरणसाध्यवह्निष्ठाभावप्रतियोगितावछे
दको योयस्तदन्यत्वे सति तत्संबंधावछिन्नाधेयतावछेदकत्वरूपं तत्संबंधेन साध्यव्यापकतावछेदकत्वं निरूप्य तादृशा
व्यापकतावछेदिका यदभावप्रतियोगिता तादृशाभावा प्रवेशनीयाः॥ न च तत्संबंधावछिन्नाधेयतेत्यादिकं व्यर्थं द्र
व्यत्वाद्यभावप्रतियोगिताया अपि संयोगादिसंबंधेन वह्न्यादिव्यापकतावछेदकत्वापत्त्या यावदंतर्गतस्य तत्संबंधेन ४

द्रव्यत्वाद्यभावस्यसाध्यव्यापकतावच्छेदकीभूतसंयोगसंबंधेनप्रतियोगिसामानाधिकरण्याप्रसिध्यासद्धेतुमात्रए
वअसंभववारणार्थंतदुपादानात्॥संयोगसंबंधावछिन्नाधेयत्वस्यद्रव्यत्वादावसत्वेनद्रव्यत्वादिनिष्ठप्रतियोगित्वस्य
तादृशाधेयतानवछेदकत्वात्॥तत्संबंधेनस्वावछिन्नानधिकरणत्वंतुतत्संबंधेनस्वावछिन्नाधिकरणसामान्य
भेदः॥तेनवह्न्यादिनिष्ठप्रतियोगितावछिन्नाधिकरणगगनोभयभेदस्यघटत्वादिनावह्न्यादिनिष्ठप्रतियोगितावछि
न्नाधिकरणभेदस्यचवह्न्यादिमत्साध्यवतिसत्वेपिनक्षतिः॥अत्रअभावाइतिस्वरूपकथनंवस्तुतःसाध्यवन्निष्ठाभा
वस्यतत्संबंधावछिन्नप्रतियोगितायाःसामानाधिकरण्यंनअनवछेदकत्वमेवतत्संबंधेनसाध्यव्यापकतावछे
दकत्वंवाच्यं॥तत्रसाध्यवन्निष्ठत्वमभावस्यस्वरूपसंबंधेनग्राह्यंतेनसंदकालत्वादित्यादौस्पंदत्वाद्यभावस्य।

पिकालिकादिसंबंधेनसाध्यवत्तिवृत्त्यायावदनंतर्गतत्वात्।घटत्वादिनावाच्यत्वाद्यभावस्यचतादृशप्रतियोगिसमाना
धिकरणत्वेपिनातिव्याप्तिः।इत्थंचजातिसामान्याभावादेरपिवन्ह्यादिव्यापकतयातत्प्रतियोगिकस्यजात्यादिस्व
रूपकस्यहेतुसमानाधिकरणाभावत्वस्यजातिसामान्याभावाद्यात्मकप्रतियोग्यसामानाधिकरण्यादसंभ
वापत्तिरतोअभावइत्युक्तं।भावभिन्नाइतितदर्थः।यथाचसामानाधिकरण्येनावच्छेदकत्वघटितायांव्यापकता
यांनदोषस्तथाग्रेप्रपंचइष्यते॥नव्यास्तुसाध्यतावच्छेदकेत्यादि।साध्यतावच्छेदकावच्छिन्नाधिकरणानिया
वंतितत्तत्येकवृत्तिवृत्तिप्रतियोगिताकेत्यर्थः।नचैकमात्रवृत्तिसाध्यकेऽव्याप्तिः।तत्रयावत्त्वस्यानुपादेयत्वा
त्।शब्दैक्यस्यकिंचित्करत्वात्।यद्वासाध्यतावच्छेदकावच्छिन्नसमानाधिकरणायावंतोधर्मास्तत्तत्येक

५

तेन समानाधिकरणवृत्तिप्रतियोगिताकेत्यर्थ इति प्राहुः। यत्तु साध्यवदवृत्त्यभावप्रतियोगितावच्छेदकप्रतियोगि
ताकेत्यर्थ इति तन्न। केवलान्वयिसाध्यकसद्धेतौ तादृशाप्रतियोगित्वाप्रसिध्या व्याप्तेः। गगनस्वरूपाभावस्य तादृशत्वे
पि हेतुसमानाधिकरणत्वासंभवादिति। अत्र व्यापकतावच्छेदकप्रतियोगिताका इत्यत्र व्यापकताया अवच्छेदकत्वये
ति बहुव्रीह्याकप्रत्ययस्तेन प्रतियोगितयासमम् अवच्छेदकपदस्य समासे कोपधत्वेपि पुंवद्भावस्तद्धितउक्तौपपस्येव पुंवद्भा
वनिषेधादित्यभियुक्ताः सर्वत्रेति। सद्धेताव सद्धेतौ चेत्यर्थः। तथा च यावत्त्वानुक्तावतिव्याप्तिरेवस्याभावाव्या
प्तिरिति प्रायः सकलव्यभिचारिणेत्यर्थ इत्यन्ये। केचित्तु। सर्वत्रेति। सकलहेत्वधिकरणावच्छेदेनेत्यर्थ इत्याहुः।
वाच्यत्वाद्यभावस्येति। पटत्वादिना वाच्यत्वाद्यभावस्येत्यर्थः। तथात्वात् तत्प्रतियोगिसमानाधिकरणत्वात् तथा

च धूमवान्वह्नेरित्यादौ वातिव्याप्तिवारणार्थमेव यावत्पदमिति भावः। ननु साध्यतावच्छेदकव्यापकप्रतियोगिताकयावदभा
वोक्तावेव वाच्यत्वाद्यभावमादायैवोक्तस्यातिप्रसंगस्य व्युदाससंभवात् साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियो
गिताकाभावानां यावत्त्वोपादानं गौरवग्रस्तमत आह। अत एवेति। निरुक्ताभावे यावत्त्वोपादानादेवेत्यर्थः। अन्यथाहृ
तत्वाद्यभावस्य साध्यतावच्छेदकव्यापकप्रतियोगिताकान्यतादूनत्वमहत्त्वोभयत्वावच्छिन्नाभावस्य च तादृशप्रति
योगिताकस्य स्वविशिष्टहेत्वधिकरणावच्छेदेन प्रतियोगिसमानाधिकरणत्वादतिव्याप्तिः स्यादेवेति भावः। यत्तु
साध्यप्रतियोगिको यत्किंचिदभावो यद्धर्मावच्छिन्नहेत्वधिकरणावच्छेदेन प्रतियोगिसमानाधिकरणस्तद्धर्मवत्त्वमि
ति व्याप्तिलक्षणमस्तु कृतं यावत्त्वगर्भनिरुक्त्या धूमवान्वह्नेरित्यादौ घटत्वेन धूमाभावस्यापि तादृशहेत्वधिकरणाव

च्छेदेन प्रतियोग्यसमानाधिकरणत्वादतिव्याप्तिव्युदासादित्याशंक्यान्तरेवेत्यादिकमवतारयंति। तत्तुच्छं। तादृशाशंका
यां धूमवान्वह्नेरित्यादिप्रसिद्धस्थल एव वह्निधूमोभयत्वावच्छिन्नाभावमादायातिव्याप्तिसंभवेऽनंतत्वमूर्त्तत्वोभयवा
नित्याद्यनुधावनेनास्य संदर्भविरोधापत्तेः। यदपि तादृशाभावस्य प्रतियोगितायाः व्यापकं साध्यतावच्छेदकं तादृशः कश्चि
दभावो यद्धर्मावच्छिन्नहेत्वधिकरणावच्छेदेन प्रतियोगिसमानाधिकरणस्तद्धर्मवत्त्वं व्याप्तिरित्युक्तौ चैव वाय्वत्वा
द्यभावमादायातिव्याप्तिवारणासंभवाद्यावत्त्वगर्भलक्षणं गौरवग्रस्तमत उक्तमन्तरेवेत्यादीति तदप्यसंगतं। प्रतियो
गितामात्रस्यैव गत्येकं पर्यवसितत्वेन वह्निधूमोभयत्वादेस्तद्व्यापकत्वासंभवाद्वह्निधूमोभयवान्धूमादित्यादौ व
व्याप्तिभयेन तादृशातिरुक्तैः शंकितुमशक्यत्वात्। ननु प्रतियोगिसामानाधिकरण्यमित्यत्र प्रतियोग्यधिकरणं

साध्यनिरूपितसाध्यतावच्छेदकसंबंधेनव्याप्यमित्यत्वंयावत्त्वनिवेशेनेत्यत आह। अतएवेत्यादीत्यपिवदंति। नव्यास्तु
ननुसाध्यतावच्छेदकातिरिक्तधर्मानवच्छिन्नसाध्यनिष्ठयादृशप्रतियोगिताकोयत्किंचिदभावोयदधिकरणावच्छेदेन
तादृशप्रतियोगिताश्रयसमानाधिकरणास्तत्त्वमित्यस्यैवसम्यक्त्वेयावत्त्वगर्भलक्षणारंभोगौरवग्रस्तः। प्रमेयवा
न्वाच्यत्वादित्यादौगगनाद्यवच्छिन्नप्रतियोगिताकविरुद्धकटत्वपटत्वोभयावच्छिन्नप्रतियोगिताकप्रमेयाभावमा
दायैवलक्षणसंभवेगगनाद्यगनादेर्वृत्तिमत्त्वलक्षणधर्मत्वाभावात्। सामान्याभावीयान्यप्रतियोगित्वंचप्रत्याश्रयं
स्वरूपसंबंधेनविच्छिन्नं। अतोगगनावच्छिन्नप्रतियोगिताकप्रमेयमात्रस्याभावमादायैवधूमवान्वह्नेरित्यादौ
व्यभिचारिमात्रेनातिप्रसंगः। नव्यानवच्छिन्नांतवैयर्थ्यं। वह्निधूमोभयत्वावच्छिन्नाभावमादायधूमवान्वह्नेरित्यादा

वतिव्याप्तेर्वारकत्वात्। साध्यनिष्ठपदमपि तदर्थमेव। अन्यथा गगनाद्यवच्छिन्नप्रतियोगिताकवाच्यत्वाद्यभावमादाय व्यभिचा
रिमात्रे अतिव्याप्त्यापत्तिरत आह अत एवेति। इत्थं च प्रकृते तत्तद्विशिष्टमूर्तत्वाद्यभावस्य साध्यतावच्छेदकातिरिक्तधर्मा
वच्छिन्नप्रतियोगिताकतया तस्य प्रतियोगितांशे यत्सामानाधिकरण्येनातिव्याप्तिं संपादयतीत्यत्रायेन द्वित्वावच्छिन्नाभाव
पर्यंतस्य प्रतियोगिसामानाधिकरण्याभिधानमपि साधु संगच्छते। परं तु। प्रकृतसाध्यव्याप्यतावच्छेदकप्रतियोगिताकः कश्चि
दभावो यदधिकरणावच्छेदेन प्रतियोगिसमानाधिकरणस्तत्त्वमेवाव्यभिचरितत्वं कुतो नोक्तं। प्रकृते तत्तन्मूर्तत्वोभयत्वावच्छि
न्नप्रतियोगिताव्यक्तेस्तादृशोभयात्मकसाध्यव्याप्यतावच्छेदकत्वाभावादेव तादृशोभयाभावमादायातिव्याप्त्यसंभ
वादिति तु विभावनीयमिति प्राहुः। केचित्तु। ननु साध्यतावच्छेदकावच्छिन्नपदस्य व्यर्थतया साध्यव्यापकतावच्छेदकप्रतियो

गिताकाभाव एव यावत्त्वविशेषणमुचितम् अत आह। अत एवेति। निरुक्ताभावे यावत्त्वोपादानादेवेत्यर्थ इति प्राहुः। भूतत्व
मात्मभिन्नत्वे सति विशेषगुणवत्त्वं। तच्च न व्यापकतायाः प्रतियोगिवैयधिकरण्यघटितत्वे कस्यापि भूतत्वमूर्त्तत्वोभयस्य व्या
पकं तद्द्वयाभाववति घटादौ उत्पत्तिक्षणावच्छेदेन विशेषगुणत्वावच्छिन्नत्वाभावसत्त्वात् तदुक्तं मनोन्यत्वे सति साध्यस्यैवा
भावमादाय नातिव्याप्तिः सुतरां तु वस्त्वंतरस्येति कैमुतिकन्यायेनोक्तं मनोन्यत्वेत्यपि वदंति। अतथात्वात्। स्वविशिष्टहे
त्वधिकरणावच्छेदेन प्रतियोग्यसमानाधिकरणत्वात् मनस्येव व्यभिचारादित्यर्थः। ननु यत्समानाधिकरणाः यावंतो
अभावाः प्रतियोगिसमानाधिकरणाः तत्त्वमित्यस्यैव सम्यक्त्वे साध्यतावच्छेदकावच्छिन्नेत्यादिकं व्यर्थं। अभावस्य समा
नाधिकरणधर्मावच्छिन्नस्वकीययत्प्रतियोगिताश्रयसामानाधिकरण्यं तदन्यप्रतियोगिताया एव व्याप्यवृत्तितानि

रूपकतयाध्वंसाद्यभावस्यपूर्वक्षणवृत्तित्वविशिष्टस्वाभावाभाववनिष्ठप्रतियोगितायाःअतथात्वेनधूमवान्वह्नेरित्यादा
वतिव्याप्त्ययोगात्।अतआह।साधनेत्यादि।गोत्वादीत्यादिपदेनगगनादिसंग्रहः।तथाचतदनुक्तावसंभवएवेतिभावः।स्यादिर
नन्वेवंयत्समानाधिकरणायावंतःसाध्यप्रतियोगिताकाभावाःसाध्यतावच्छेदकसंबंधेनप्रतियोगिसमानाधिकरणास्त
त्वमित्येवोच्यतांतावतैवगोत्वाद्यभावमादायासंभवस्यव्युदासादतआह।तन्नेति।तथाचोक्तविवक्षायांद्रव्य
त्वाद्येकव्यक्तिसाध्यकसत्येतौलक्षणसंभवेपिवह्निमान्धूमाज्जातिमान्सत्वादित्यादौसाध्यप्रतियोगिताकानां
तत्तद्वत्त्वाद्यभावानांआत्मत्वाद्यभावानांचप्रतियोग्यसमानाधिकरणत्वादव्याप्तिरितिभावः।नचसाध्यव्यापक
प्रतियोगिकइत्यस्यैवसम्यक्त्वेव्यापकतावच्छेदकप्रतियोगिताकत्वपर्यंतंव्यर्थमितिवाच्यं।तत्तत्साध्यव्यक्तीनां

गनो गेहीनां च प्रमेयत्वादिप्रकारेण साध्यव्यापकतया तदभावप्रमादाया संभवापत्तेः । न च स्वानधिकरणसाध्यवन्निष्ठाभा
वाप्रतियोगित्वेन साध्यव्यापकत्वं निरुच्यते तत्प्रतियोगिकाभाव एव निवेश्यतामिति वाच्यं । तस्य लक्षणांतरत्वेप्युक्तलक्षण
स्याऽदुष्टत्वादिति भावः । यत्समानाधिकरण्या इत्यत्र हेत्वधिकरणत्वं विशिनष्टि । येनेत्यादिना । तदधिकरणमिति । तत्संबंधी
त्यर्थः । तेनैतोने तादात्म्येनाधिकरणाप्रसिद्धावपि तत्तत्संबंधेन सत्वेनैनाव्याप्तिः । अतथात्वेपीति । प्रतियोग्यधिकरणवृ
त्तित्वविरहेपीत्यर्थः । यद्यपि प्रतियोगिसामानाधिकरण्यं अवश्यं स्वविशिष्टहेत्वधिकरणावच्छेदेन अग्रे विवक्षणी
यं । तथा च हेतुतावच्छेदकसंबंधेन हेत्वधिकरणानुक्तौ कालिकसंबंधेन धूमस्याधिकरणे महाकाले वर्तमानस्य प्र
ळयान्यत्वाद्यभावस्यापि यावदंतर्गतत्वेन स्वविशिष्टहेतुतावच्छेदकसंबंधेन हेत्वधिकरणाप्रसिद्ध्या वह्निमान् धूमा ९

दित्यादावव्याप्त्यापत्तिः संभवति। तथापि स्वविशिष्टत्वेहेत्वधिकरणेत्यादेरुक्तावनुक्तौ चोभयथापि अयमात्मा ज्ञानादित्य
त्राव्याप्तिः वह्निमान्धूमादित्यत्र स्वविशिष्टत्वस्योक्तावेव तथेत्याशयेन प्रसिद्धोदाहरणं परित्यक्तं। यत्तु महाकालस्यै
व प्रकृत्यान्यत्वाद्यभावविशिष्टहेत्वधिकरणत्वसंभवात्स्वविशिष्टत्वस्योक्तावपि वह्निमान्धूमादित्यत्राव्याप्तिः महा
कालस्य हेतुना घटकसंयोगेन धूमाधिकरणत्वाभावेपि हेतुसंबंधित्वानपायात्तादात्म्येन हेतोरसंग्रहार्थं हेतुतावच्छे
दकसंबंधेन यो हेतुसंबंधी तद्वृत्तियावदभावानामेव निवेशनीयत्वादिति मतं। तत्तुच्छं। संयोगमात्रेण धूमे हेतोः प्रभामं
डलादौ वह्निव्यभिचारितया पर्वतादिनिरूपितसंयोगेनैव तस्य हेतुत्वात्तादृशसंबंधेन च धूमस्याधिकरणपर्वता
दौ प्रकृत्यादिस्वरूपस्य प्रकृत्यान्यत्वाद्यभावस्य वैशिष्ट्याप्रसिद्धेरावश्यकत्वात् विभिन्नकालीनयोर्विषयित्वान्यसं

ने बंधेनसंबंधसामान्येस्यैव वारोधाधेयभावविरहादितिदिक्॥ ननुयद्वृत्तीत्ववान्महाकालत्वान्महाकालकपालाभ्य
तरत्वादित्यादावतिव्याप्तिः। साधनसमानाधिकरणस्यमहाकालान्यत्वाद्यभावस्यापिहेत्वधिकरणमहाकालाद्यवच्छेदे
नकालिकसंबंधेनैवप्रतियोगिसमानाधिकरणत्वाद्तआहरूपत्वमिति। दृष्टांतरेपिप्रतियोगिसामानाधिकरण्यदृष्टे
पीत्यर्थः। एकसंबंधेनव्यापकत्वमन्यसंबंधेनप्रतियोगिसामानाधिकरण्यमित्येवंसंबंधभेदनिबंधनः प्रोक्तातिव्या
प्तिरूपदोषः साध्यव्यापकताघटकसंबंधेनसार्धं प्रतियोगिसामानाधिकरण्यघटकसंबंधस्यैक्यविवक्षयानिरस
नीयइत्यर्थः। तथाच तत्संबंधेनस्वावच्छिन्नानधिकरणसाध्यवन्निष्ठाभावप्रतियोगितावच्छेदकंयद्यत्तदन्यप्रतियो
गिताकः। साध्यवन्निष्ठाभावीयतत्संबंधावच्छिन्नप्रतियोगितासमानाधिकरणावच्छेदकान्यप्रतियोगिताको १०

योऽभावस्तस्य तादृशसंबंधेन प्रतियोगिनो यदधिकरणं तद्वृत्तित्वं विवक्षितमिति फलितार्थः। पृथिवीत्वाद्यभावप्र त
तियोगित्वं तु न कालिकसंबंधेन पृथिवीत्वादिव्यापकतावच्छेदकं नित्यपृथिव्यां व्यभिचारात्। किंतु समवायेनैव तेन
संबंधेन पृथिवीत्वाद्यभावस्य हेत्वधिकरणमहाकालावच्छेदेन प्रतियोग्यसामानाधिकरण्यान्नोक्तातिव्याप्तिरि
ति भावः। यत्तु येन संबंधेन व्यापकत्वं तेन संबंधेन प्रतियोगिसामानाधिकरण्योक्तावपि नित्यज्ञानं नित्यसविषयक
त्वादित्यत्रातिव्याप्तिः। साधनसमानाधिकरणस्यैक्याभिन्नत्वाद्यभावस्यापि साध्यव्यापकताघटकविषयतासंबंधेन
यावद्वृत्त्यधिकरणे प्रतियोगिसमानाधिकरणत्वात्। न च येन येन संबंधेन व्यापकत्वं तेन तेन संबंधेन प्रतियोगिसामा
नाधिकरण्यविवक्षणान्नोक्तदोषः। तथा सति यावत्सद्वैयर्थ्यापत्तेः। विशेषणतासामान्येनैव साध्यवत्त्विरूपि

नविशेषणान्तर्यापिवाच्यत्वादेस्साध्यव्यापकतया घटत्वादिना वाच्यत्वाद्यभावस्यैव हेत्वधिकरणावृत्त्यप्रतियोगिसामानाधिक
रण्यविरहाद्धूमवान्वह्नेरित्यादिव्यभिचारिण्यतिव्याप्त्यसंभवादिति तन्मंदं। विषयितासंबंधेन व्यापकताया एवावस्थानात् विषयितासं
बंधेन स्वावच्छिन्नाधिकरणाप्रसिद्ध्या स्वावच्छिन्नाधिकरणसाध्यवन्निष्ठत्यादिव्यापकतायाः तेन संबंधेनासत्त्वात्। न च तेन संबंधेन
स्वावच्छिन्नसंबंधित्वमेव व्यापकतायां निवेश्यं तदुक्तातिप्रसंगभयेनैव तस्यानिवेशनीयत्वात्। न च तत्संबंधावच्छिन्नायाः साध्यवन्नि
ष्ठाभावप्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकधर्मत्वमेव तल्लक्षणं व्यापकत्वं विषयितासंबंधेन सुलभं साध्यवति नित्यज्ञ
ज्ञानेन वस्तुमात्रस्यैव विषयतासंबंधेन सत्त्वेऽपि नित्यज्ञानान्यत्वविशिष्टस्य घटादेः विषयतासंबंधेन अभावस्य तत्र सत्त्वे बाधका
भावादिति वाच्यं। विषयितायाः वृत्त्यनियामकत्वेन तेन तत्संबंधावच्छिन्नप्रतियोगिताप्रसिद्धेः। यद्यपि मनस्त्ववानणुत्वादिस

त्राति व्याप्तिः अणुत्वसमानाधिकरणस्य महत्त्वाद्यभावस्य साध्यव्यापकताघटकदिक्कृतविशेषणतया सर्वत्रैव परमा
ण्वादिप्रतियोगिसमानाधिकरणत्वादिति तदपि तुच्छं । नित्यानामभावर्तकत्वात् जन्यानामेव मूर्तानां दिगुपाधिकृतयाप
रमाणोरदिक्कृतविशेषणतयाकस्याप्यसत्त्वात् तेन संबंधेन साध्यव्यापकत्वविरहात् । अन्यथा वस्तुमात्रस्यैव कालोपाधित्वसं
भवात्तदपि जन्यमात्रस्य न स्यात् । अत एव प्रलयदशायां दिग्देशविभागो नास्तीत्यादिद्धूंसितः संगच्छते । अन्यथा परमा
णूनां सत्त्वाच्चदानीमपि दिग्विभागप्रसंगादिति दिक् । यदि च स्पंदो महाकालत्वादित्यादावतिव्याप्तिः साधनसमानाधिकरण
स्य महाकालान्यत्वाद्यभावस्यापि साध्यव्यापकताघटककालिकसंबंधेन प्रतियोगिसमानाधिकरणत्वात् । न च स्पंद इत्या
कारकयत्किंचिद्बोधव्यक्तेः विषयतासंबंधेनैव साध्यव्यापकत्वात् । यावदंतर्गतस्य तदभावस्यैव साध्यव्यापकताघटकवि

भूतभावि
स्पंदे २

षयतासंबंधेनहेत्वधिकरणमहाकालप्रतियोगिसमानाधिकरणमहात्त्वाभावान्नातिव्याप्तिः।नहितादृशबोधव्यक्तौकालि
कसंबंधेनापिस्पंदत्वव्यापकत्वं [illegible] व्यभिचारादितिवाच्यं।विषयतयाज्ञानसमानकालीनतयातद्बुद्धिव्य
भो[illegible]त्त्यवदभूतायामेवस्पंदत्ववतीविषयतासंबंधेनतद्बुद्धिव्यक्त्यभावस्यसत्त्वाद्विषयतासंबंधेनस्पंदइत्याकारकज
न्यबुद्धेःसाध्यव्यापकत्वासंभवात्।किंचव्यधिकरणधर्मावच्छिन्नाभावासत्त्वेपिव्यधिकरणसंबंधावच्छिन्नवाच्यत्वात्यंता
भावमादायैवकेवलान्वयिसाध्यकस्थलेलक्षणसमन्वयात्प्रतियोग्यवृत्तिश्चेत्यादिमूलस्यदूषकत्वानुपपत्तेः।नचसाध्य
वन्निष्ठाभावीप्रतियोगितायाःसामानाधिकरण्यनानवच्छेदकत्वरूपव्यापकतायांव्यधिकरणधर्मावच्छिन्नाभावमा
दायासंभववारकस्यसामानाधिकरण्येत्यस्यव्यर्थतायामेवतन्मूलग्रंथस्यतात्पर्यमितिवाच्यंसामान्यधर्मेणविरोधा

भावमादायव्यापकत्वस्याप्रसिद्धेर्वारणार्थमेवसामानाधिकरण्यदलस्यव्यापकतायामवश्यंनिवेशनीयत्वादित्यादिकंवि
भाव्यतेतदासंबंधेनस्यविवक्षयेतिगंभस्यसाध्यव्यापकत्वस्यतदवच्छेदकप्रतियोगित्वस्यप्रतियोगिसामानाधिकरण्यघटकी
भूतप्रतियोग्यधिकरणत्वस्यचैकसंबंधावच्छिन्नत्वविवक्षयेत्यर्थः।तथाचस्वप्रतियोगितावच्छेदकसंबंधेनसाध्यव्यापकता
वच्छेदकप्रतियोगिताकायावंतोऽभावाःस्वप्रतियोगितावच्छेदकसंबंधेनप्रतियोगिसमानाधिकरणाइत्यर्थलाभाद्यावदं
तर्गतस्यसमवायादिसंबंधेननित्यज्ञानत्वमनस्त्वस्पंदत्वाद्यभावस्यप्रतियोगितावच्छेदकीभूतसमवायादिसंबंधेनयावद्वृ
त्यधिकरणेप्रतियोग्यसमानाधिकरणत्वात्नित्यज्ञानेनित्यसविषयकत्वान्मनस्त्ववीदणुत्वात्स्पंदोमहाकालत्वादित्यादौन
कुत्राप्यतिव्याप्तिः।नचैवंवाच्यंज्ञेयत्वादित्यादावव्याप्तिः।व्यधिकरणधर्मावच्छिन्नवाच्यत्वाद्यभावस्यैवतत्रघटकतया

तस्यप्रतियोगितावच्छेदकसंबंधसत्वेमानाभावादितिवाच्यं।स्वरूपसंबंधेनघटत्वादिनावाच्यत्वंनास्तीतिप्रतीत्यनुरोधेनतादृशाभाव
स्यापिप्रतियोगितावच्छेदकसंबंधत्वस्वीकारात्।अन्यथाभूतलंसंयोगेनघटत्वावच्छिन्नपटवदित्येवंनिर्णयसत्वेपिभूतलेसंयो
मप३ गेनघटत्वेनपटोनास्तीतिप्रत्ययापत्तेः।नचैवंसिद्धांतोव्यधिकरणधर्मावच्छिन्नोपिचेदभावःप्रामाणिकः।तदासर्वैःसंबंधैः
स्वप्रतियोगितावच्छिन्नतामितिग्रंथकृतैवसामान्याभावेवक्ष्यमाणत्वात्।केचित्तुसंबंधैक्यविवक्षयेत्यस्यसाध्यवत्वंसा
ध्यव्यापकत्वंप्रतियोगित्वंप्रतियोगिसामानाधिकरण्यघटकीभूतप्रतियोग्यधिकरणत्वंचैकेनसाध्यतावच्छेदक
संबंधेनविवक्षणीयमित्यर्थः।तथाचसाध्यतावच्छेदकसंबंधावच्छिन्नसाध्यव्यापकतावच्छेदकीभूततादृशसंबंधा
वच्छिन्नप्रतियोगिताकाःयावंतोअभावाःसाध्यतावच्छेदकसंबंधेनप्रतियोगिसमानाधिकरणाइत्यर्थलाभात्

कुत्राप्यतिव्याप्तिः। न च प्रतियोगितायाः साध्यतावच्छेदकसंबंधावच्छिन्नत्वविवक्षणं व्यर्थमिति वाच्यं। तदनुक्तौ वाच्यत्वादिम-
दमादायैव केवलान्वय्यादौ लक्षणासंभवे प्रतियोग्यवृत्तिश्चेत्यादिमूले तन्निराकरणस्यासंगतत्वापत्तेः। न चैवमपि स-
र्वत्र वाच्यत्वाद्यभावस्येत्यादिग्रंथस्य विरोधो वाच्यत्वादेः संयोगादिसंबंधेन धूमाद्यव्यापकत्वादिति वाच्यं। वाच्य-
त्वाद्यभावस्येत्यत्र आदिपदसत्त्वाद्यत्र स्वरूपसंबंधेन साध्यता तत्र स्वरूपसंबंधेन वाच्यत्वाभावमादाय संयोगादिसंबं-
धेन साध्यतायां च द्रव्याद्यभावमादायातिव्याप्तिपरतयैव तत्संगतेरित्याहुः॥ तन्मंदं मनोन्यत्वाद्यभावस्येत्युक्तग्रंथविरो-
धात् भूतत्वमूर्तत्वोभयस्य समवायेन साध्यतायां मनोन्यत्वस्य तत्संबंधेन साध्यव्यापकत्वासंभवात् वृत्त्यनियामकसंबंधे-
नाधिकरणत्वस्य प्रतियोगित्वस्य चाप्रसिद्ध्या तेन संबंधेन साध्यतायां धनी चैत्रत्वादित्यादिसद्धेतावव्याप्तेः। तद्रूपान्यरू

पंरूपत्वादित्यादावतिव्याप्तेश्च साध्यताघटकसमवायसंबंधेन साध्यव्यापकतावच्छेदकप्रतियोगिताकानां व्यधिकर
णधर्मावच्छिन्नगुणत्वाद्यभावानां सर्वेषामेव स्वविशिष्टहेत्वधिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्यादिति
। यत्तु विशेषणताविशेषेण साध्यव्यापकत्वं तेनैव प्रतियोगित्वं प्रतियोगिसामानाधिकरण्यं च संबंधैक्यविवक्षयेत्यस्यार्थमाहुः । त
दपि गोत्वाद्यभावस्यात्मत्वाद्यभावस्येत्यादिग्रंथस्यालग्नकत्वापत्तेरुपेक्षितमिति । नन्वेतावताप्ययमात्मा ज्ञानादित्यादावव्याप्ति
रेव घटत्वादिनात्मत्वसामान्याभावस्यापि स्वविशिष्टहेतोर्विषयतयाधिकरणे घटादौ व्यापकताघटकसमवायसंबंधेन प्रतियो
गिसामानाधिकरण्याभावादत आह । आदर्शांतरे पीति । पश्चादुक्तहेत्वधिकरणदेशेपीत्यर्थः । संबंधभेदनिबंधनो दोषः । एकसंबंधेन
हेतुसामानाधिकरण्यघटकहेत्वधिकरणत्वं स्वविशिष्टहेत्वधिकरणेत्यत्र अन्यसंबंधेन हेत्वधिकरणत्वनिबंधनोऽव्याप्ति

१४

रूपो दोष इत्यर्थः। संबंधैक्यविवक्षयेति। हेतुसमानाधिकरणे सत्त्वं हेत्वधिकरणत्वं येन संबंधेन स्वविशिष्टहेत्वधिकरणावच्छेदेन स्य
त्रापि हेत्वधिकरणत्वं तेनैव संबंधेन विवक्षणीयमित्यर्थः। इत्थं च दृष्टांतरपदमपि साधु संगच्छत इति न व्याप्यद्वा धूमवान्व
ह्नेरित्यत्रातिव्याप्तिः। धूमसामान्याभावस्यापि हेत्वधिकरणायोगोलकावच्छेदेन स्वप्रतियोगित्वस्य कालिकसंबंधेनाश्रयी
भूतवह्न्यादेः समानाधिकरणत्वादत आह दृष्टांतरेपीति। प्रतियोगिसामानाधिकरण्यमित्यत्र प्रतियोगिताश्रयदृष्टेपी
त्यर्थः। संबंधभेदनिबंधनो दोषः प्रकृतसाध्यव्यापकत्वस्य एकसंबंधावच्छिन्नावच्छेदकप्रतियोगिताकाभावस्य अन्यसंबंधा
वच्छिन्नप्रतियोगिताश्रयीभूतवह्न्यादेः सामानाधिकरण्यनिबंधनो दोषः। संबंधैक्यविवक्षया यत्संबंधेन साध्यव्यापक
तावच्छेदकत्वं प्रतियोगित्वस्य प्रतियोगिसामानाधिकरण्यमित्यत्रापि तेन संबंधेन प्रतियोगित्वाश्रयत्वविवक्षयेति संक्षेपः। अ

त्संबंधैक्यविवक्षायां रूपसामान्याभाववान् पृथिवीत्वाज्जन्यपृथिवीत्वाद्वेति विरुद्धहेतावव्याप्तिव्याप्तिः।साधनसमानाधिकर
णस्य पृथिव्यन्यत्वाद्यभावस्यापि हेत्वधिकरणपृथिवीत्वावच्छेदेन जन्यपृथिवीत्वावच्छेदेन वा दिक्कृतविशेषणतया प्रतियोगिसामा
नाधिकरण्यात्। वर्तमानस्यैव दिगुपाधित्वोपगमात्। न चैतस्यालक्ष्यत्वे नीरूपमित्याकारकयत्किंचित्समानव्यक्तिविषयतासं
बंधेन साध्यव्यापकत्वाद्यावदंतर्गतस्य तदभावस्यैव हेत्वधिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्यविरहान्नातिव्याप्तिः।
बुधि तदंशे बुद्धिव्यक्तेर्भिन्नकालीनघटादौ केनापि संबंधेनासत्वादिति वाच्यं। विषयतायाः ज्ञानसमानकालीनतया तादृशबु
द्ध्यभाववद्दशायामेव रूपवत्त्वे गगनादौ विषयतासंबंधेन तद्बुद्ध्यभावप्रतियोगित्वावच्छिन्नाभावसत्वात्तादृशव्यक्त्यभा
वस्य साध्यव्यापकतावच्छेदकप्रतियोगिताकत्वाभावात्। स्वावच्छिन्नानधिकरणसाध्यवन्निष्ठत्वादिव्यापकतायाः

तद्बुद्धिव्यक्तौ ग्रसत्वेपि प्रतियोगिवैयधिकरण्याघटितव्यापकत्वभंगे निरुक्तेरुक्तस्वहेतोरिति व्याप्तेरावश्यकत्वादितिभ ग्रं
निराकुरुते रूपादिसामान्यत्वादि। पृथिवीत्वादिकमिति। नित्यपृथिव्यादिगुणाधित्वेमानाभावादादिपदं तेन जन्यपृथिवी
त्वाद्युपग्रहः। सद्रूपत्वप्रतिकूलविरोधं निरस्यति प्रलयइति। महाप्रलयइत्यर्थः। खंडप्रलये तु पार्थिवपरमाणौ रूपमस्त्ये
व अन्यथोत्तरसर्गे पार्थिवद्व्यणुकस्य रूपोत्पत्त्यर्थं परमाणौ पाकांतरकल्पनापत्तेरिति प्राञ्चः। प्रलयइत्यस्य पाकेन रूपोदः
प्रलयदशायामित्यर्थः। तेन महाप्रलयानभ्युपगमेपि न क्षतिः। उत्पत्तिकालेचेत्यत्र निरुक्तप्रलयस्याप्यनुकर्षो द्धः। अवय
भवा वि●न्यपि पाकदशायां तत्संन्निधे न्यूनतेत्यपरे। ननु विरोधविरहेपि घटाद्यवच्छेदेन व्यभिचारित्वात् कुतः सध्येतुत
मत आह। उत्पत्तीति। यद्यपि पाकेन श्यामादिरूपनाशकाले अवयविनि रूपसामान्याभावसत्त्वं तथापि पीलुपाक

१६ वादिमते तदभावादपच्यमानावयव्यनुरोधाच्चोत्पत्तिकालमात्रानुसरणं तत्सत्वादिति। रूपसामान्याभावसत्वादित्यर्थः। प्र
तियोगिवदिति। प्रतियोगिन इवेत्यर्थः। विरोधित्वं एकदैकदेशावृत्तित्वं। मानाभावादिति। प्रयोद्घवच्छेदेन परमाण्वादौ
रूपादिसामान्याभावे तु योग्यसंन्निकर्षाभावात्प्रत्यक्षासंभवेप्यनुमानादिकमेव मानमस्तीत्याशयः। यत्तु घटादावुत्पत्ति
कालावच्छेदेन रूपसामान्याभावस्य प्रत्यक्षमेव संभवति। तदानीं चक्षुःसंयुक्तविशेषणतायास्तत्राप्यसत्वेपि द्रव्यसमवेतरू
त्यभावप्रत्यक्षहेतोश्चक्षुःसंयुक्तसमवेतविशेषणतायाः सत्वेन संन्निकर्षसंभवादिति। तन्न। चक्षुःसंयुक्तसमवेतद्व्य
णुकविशेषणतया रूपाद्यभावचाक्षुषापत्त्या चक्षुःसंयुक्तयोग्यविशेषणताया एव अभावग्राहकत्वेन द्रव्यान्यद्रव्य संयुक्त
समवेतवृत्त्यभावचाक्षुषत्वस्यैव तज्जन्यतावच्छेदकत्वात्। अन्यथा त्रसरेणुवृत्त्यभावचाक्षुषे व्यभिचारापत्तेः। वस्तुतः स्वोत्पत्तेः

एवं चक्षुःसंयुक्तसमवेतस्य घटादेरसत्वात्तद्विशेषणतया अपि तदानीमसत्वादुक्तक्रमेण हेतुतेव नास्तीति ध्येयं। अत एवेति
ध्वंसप्रागभावयोरत्यन्ताभावविरोधित्वमानाभावादेवेत्यर्थः। रक्तिमध्वंसप्रागभावयोः सत्वमावेदयन्नुभंगरापदं रक्तं रूप
मिति। न च गुणे शुक्लादयः पुंसीति अनुशासनादुक्तो रूपेत्येव प्रयोगो युक्तमिति वाच्यं। वस्त्वंतरविशेषणत्वा[illegible]
नापन्नस्यैव शुक्लादिपदस्य पुंस्त्वानुशासनादत एव शुक्लं रूपमिति प्रयोगः समासे मणिकृतैव वक्ष्यत इति ध्येयं। एवं
रक्तं रूपं नास्तीत्याकारक प्रत्ययः पूर्वमित्यादि। पूर्वं रक्तस्य ध्वंसवति उत्तरं रक्तस्य प्रागभाववति इदानीं रक्तं नेत्यर्थः।
न च रक्ततादृशायां वर्तमानस्यापि रक्तध्वंसादेः तदानीं रक्तत्वावच्छिन्नप्रतियोगिताकत्वविरहान्न तादृशप्रत्ययस्तस्या
प्यव्याप्यवृत्तित्वादिति वाच्यं। ध्वंसादिप्रतियोगित्वस्य धर्मानवच्छेद्यत्वात्। तत्तदनंतध्वंसप्रागभावादिघटितत्वावच्छिन्न

१८ प्रतियोगिताकत्वकल्पनामपेक्ष्य रक्तत्वाद्यवच्छिन्नात्यंताभावसंबंधस्यैवांतराश्यादिषु कल्पनायाः लघुत्वाच्चान च यावं
तिरक्तरूपाणि तत्तद्व्यक्तित्वेतरधर्मावच्छिन्नतत्तद्व्यक्तिनिष्ठप्रतियोगिताकाभावैरेव रक्तं रूपं नास्तीति प्रत्ययः स्वीक्रिय
ते प्रकृते च विद्यमानरूपप्रतियोगिकस्य तादृशाभावस्यासत्वान्न तथा प्रतीतिरिति वाच्यं। तथा सत्यंतराश्यामरक्तं रूपं ना
स्तीत्याकारकनिर्णये पि रक्तं रूपमस्तीति प्रत्ययापत्तेः। विरोधिनः सामान्याभावस्यानिश्चितत्वाद्विशेषाभावकूटनिश्च
यस्याप्रतिबंधकत्वात्। अन्यथा सामान्याभाव एव न सिध्येदिति भावः। श्रो च वस्तुतः प्रतियोगितासंबंधेन रूपत्वमात्रावच्छिन्न
प्रकारताकः संसर्गाभावविरोध्यकप्रत्ययो रूपत्वावच्छिन्नप्रकारताकबुद्धेर्विरोधीति रूपत्वं प्रतियोगितावच्छेदकमेव
नेति त्वन्मतादरमयां रूपत्वावच्छिन्नाभाव एव रूपं नास्तीति प्रतीतेर्विषयः किमनुरोधेन ध्वंसादिमति रूपात्यंता

भावसिद्धिरित्याहुः। अंतरान्यामे समवायेन रक्तं रूपं नास्तीति प्रतीतेः प्रामाण्यानुरोधेन ध्वंसात्यंताभावयोर्न विरोधः। अन्यथा स
मवायसंबंधावच्छिन्नप्रतियोगिताकध्वंसाप्रसिद्धेस्तत्प्रतीतेर्भ्रमत्वापत्तेरिति तु परमार्थः। तत्सामानाधिकरण्यं चेति।
प्रतियोगिसामानाधिकरण्यं चेत्यर्थः। स्वविशिष्टेति स्वपदं लक्षणघटकतत्तदभावव्यक्तिपरं। तथा च तत्तदभावाश्रयी
भूतं यत्येतुताघटकसंबंधेन हेतुतावच्छेदकधर्मावच्छिन्नाधिकरणं तदवच्छेदेन तत्तदभावे स्वस्वप्रतियोगिसामाना
धिकरण्यमास्त्विमित्यर्थः। तेन हेतुसमानाधिकरणस्य घटत्वादिना वह्न्यभावस्य कालिकसंबंधेन धूमाधिकरणे स्पं
दादौ व्यापकताघटकसंयोगादिसंबंधेन प्रतियोगिसामानाधिकरण्याभावेऽपि वह्निमान्धूमादित्यादौ नाव्याप्तिः। न वा
द्रव्यं विशिष्टसत्वादित्यादौ घटत्वादिना द्रव्यत्वाद्यभावस्य हेत्वधिकरणाद्यवच्छेदेन प्रतियोग्यसमानाधिकरण

आ॥चा॥स्व॥ कालिकसंबंधेनतत्क्षणेरूपवत्समवायेनघटादावपिविशिष्टाधिकरणतास्वीकारात्।स्वनिरूपकतावच्छेदकभेदेनअधिकरणतानांभेदात्तत्तत्क्षणानांभेदा॥
वतथात्वात्।प्रतीत्यननुरोधेनद्रव्यत्वविशिष्टसत्त्वस्याधिकरणताभ्यन्याअस्वीकारात्।समानकालीनविषयताभेदात्तद्विशिष्टगगनसंबंधिताभेदाना

१८ त्वेपिनक्षतिः।गुणादीनांविशिष्टसत्त्वानधिकरणत्वात्।यद्यपिव्याप्यवृत्तेरवच्छेदकसत्त्वेमानाभावाद्वाच्यत्वाद्यभावनि
ष्ठंयत्प्रतियोगित्वंसामानाधिकरण्यंतदवच्छेदकत्वंनहेत्वधिकरणस्यत्यसंभवःकथितातिव्याप्तितादवस्थ्यं।नचस्ववि
शिष्टहेत्वधिकरणताव्यापकीभूतप्रतियोग्यधिकरणतात्वंवृत्तित्वंवाच्यं।स्वविशिष्टपदस्यव्यर्थतापत्तेः।प्रतियोग्य
धिकरणीभूतस्यविशिष्टयावद्धेत्वधिकरणवृत्तित्वोक्तौचद्रव्यंतद्धटत्वादित्यादावव्याप्तिःयावद्धेत्वधिकरणाप्र
सिद्धेः।तथापियावंतोहेतुमद्वृत्तिधर्माःहेत्वधिकरणत्वानिवायावंतितत्प्रत्येकाश्रयीभूतप्रतियोग्यधिकरणवृत्तित्व
स्यविवक्षितत्वाददोषः।एकमात्रवृत्तिहेतोरपितत्क्षणवृत्तित्वविशिष्टस्यबहून्यधिकरणत्वानिसंतीतिनतत्राव्याप्तिः
नचप्रतियोग्यधिकरणवृत्तित्वविशिष्टयावद्धेत्वधिकरणताकत्वमात्रंसम्यक्स्वविशिष्टपदस्यहेतुसमानाधिकर

भेदागगनेतेषांप्राप्तिः॥

लाइसस्य च व्यर्थतापत्तेरिति भावः। प्रागुक्तमपि स्वविशिष्टपदं हेत्वधिकरणावच्छेदेन तस्य प्रवेशाय वार्थ्यं यद्भवती मतः पश्चादुक्तस्या
पीतस्य प्रयोजनमाह तेनेति। गोत्वादिना गवाद्यभावस्य तद्व्यक्तिकाले वृत्तावपि यदा गोत्वं तदा गौरित्यादौ नातिप्रसंग इति योज
ना। इदमुपलक्षणं तत्तद्योगोद्भेदकान्यत्वाभावस्यापि काले प्रतियोगिसामानाधिकरण्याद्धर्मवान्वह्नेरित्यादौ अति
व्याप्तिर्द्रष्टव्या। गवाद्यभावस्य प्रतियोग्यधिकरणदेशिकसंबंधेनापि वृत्तित्वमुपपादयितुमाह। गवाद्यनधिकरणेति। इ
दानीं च वृत्तेर्गौर्नास्तीति प्रत्ययाद्देशेपि काले कालिकसंबंधेनावच्छिन्नस्य गवाद्यभावस्य गवानधिकरणत्वदशायवच्छेदेन
वृत्तौ न विरोधः। नचैवं तत्तस्य यस्य च वृत्तदशायां तत्कालावच्छेदेन गवात्यन्ताभावो विषय इति वाच्यं। देशे वृत्तौ कालस्य तत्का
ले वृत्तौ देशस्यावच्छेदकत्वानुभवादेकत्राभावस्य कर्त्तृभेदाक्यत्वात्। इदानीं गगने गौर्नास्तीति प्रतीतौ गवाद्यभावस्यैव

१९ त्कालावच्छेदेन गगनवृत्तित्वावगाहितायां भ्रमत्वोपपत्तेश्च गगनाद्यभावस्य गगनादौ सार्व- कत्वेन व्याप्यवृत्तितया काला
वच्छेद्यत्वासंभवादिति भावः। तद्धृतिगवादिमतीत्यर्थः। काले जन्यकाले। ननु चरमध्वंसात्मकस्य प्रलयात्यंताभावाभा
वस्यापि यावदंतर्गतत्वात् तस्य च सृष्टिकालप्रतियोगिसामानाधिकरण्याभावात् नातिव्याप्तिरित्यत आह। महाका
लेति तथा च तस्यापि महाकाले प्रतियोगि सामानाधिकरण्यं तस्य कालिकसंबंधेन जगदाधारत्वादिति भावः। ननु
गोत्वादीनां प्रलये कालिकसंबंधेन सत्त्वे प्रमाणाभावाद्यदा गोत्वं तदा गोरिति सद्धेतुरेवेति यदि ब्रूयात् तदित्याह। यत्नकाल
त्वमिति। उक्तविवक्षानादरे घटादिसाधारणरूपेणापि गोः साध्यतायामतिव्याप्तिरिति आशयेन साध्यांतरमाह
जन्यद्रव्यमिति। द्रव्यस्य साध्यतायां कालत्वं सद्धेतुरेव। प्रलयेपि कालिकसंबंधे परमाण्वादेः सत्त्वात् कार्यद्रव्या

नधिकरणीभूतत्वे सति द्रव्यत्वैकधर्मिग्राहकमानेन तत्सिद्धेरतो व्यभिचारित्वसंपत्तये अन्यपदं। ननु महाप्रलयाद्यनंगी
कारे प्रागुक्तहेतुद्वयं द्रव्यमेव खंडप्रलयेपि ब्रह्मांडांतरे जन्यद्रव्यसत्वादतः साध्यांतरमाह प्रलयावच्छिन्नवृत्ति। खंडप्रलया
वच्छिन्नवृत्त्यर्थः। यद्यपि प्रतियोगिनो यदधिकरणं तद्वृत्तित्वस्यैव दैशिकसंबंधेन विवक्षायामपि यदा गोत्वं दोतेभोरित्यत्रा
तिव्याप्तिवारणं संभवति। प्रलयावच्छिन्नत्वावच्छिन्नाभावस्य स्वप्रतियोग्यधिकरणे महाकालादौ दैशिकसंबंधेन वृत्ति
त्वविरहात्। न च द्रव्यं महाकालत्वादित्यत्रा व्याप्तिः। कालिकसंबंधेन महाकालनिष्ठस्य द्रव्यत्वाद्यभावस्य स्वप्रति
योग्यधिकरणे दैशिकविशेषणतया वृत्त्यभावादिति वाच्यं। हेतुसामानाधिकरण्यस्यापि तादृशविशेषणतयाभि
वेशनीयत्वात्। तथापि रूपभिन्नं गुणत्वादित्यादौ साधनसमानाधिकरणरूपान्यत्वाभावस्य रूपभिन्नत्वप्रका

रकप्रमाविशेष्यत्वाभावस्य च रूपत्वादिरूपस्वपतयोर्दैशिकविशेषणतासंबंधेन वृत्तित्वविरहेण यावदनंतर्गतत्वात् घटत्वादि
नारूपान्यत्वाद्यभावस्य च सर्वस्यैव तादृशाभावस्य महाकालादेः स्वप्रतियोगिसमानाधिकरणत्वादिति व्याप्तिरतः स्वविशिष्ट
हेत्वधिकरणे स्यादिविवक्षानुसरणादिति। वस्तुतः दैशिकविशेषणताघटितस्य लक्षणांतरत्वात् एकेनापरस्यान्यथा
कर्तुमशक्यत्वादुक्तलक्षणेन तद्द्वैयर्थ्यमिति तु परमार्थः। यत्तु हेत्वधिकरणे विशेषणतया वर्तमानानां निरुक्ता-
वदभावानां तादृशसंबंधेन प्रतियोगिवृत्तित्वमेव वक्तुमुचितं न तु प्रतियोग्यधिकरणवृत्तित्वं। अधिकरण
प्रवेशे गौरवात्। सर्वत्र व्यभिचारिस्थलान्यत्वाभावमादायातिव्याप्त्यभावादिति। तत्तुच्छं। स्ववृत्तित्वविशिष्टा
नां केवलान्वयिधर्माणामभावानां प्रतियोग्यवृत्तित्वेनानुभवापत्तेः। नहि वाच्यत्वादिवृत्तित्वविशिष्टा

न्तो वाच्यत्वादीनामभावो वाच्यत्वादिप्रतियोगिकवृत्तिरिति दिक्। प्राचां मते संयोगसामान्याभावस्य साध्यकं मेयत्वं द्रव्य एव
व्यभिचारीत्यतः कपिपदं प्रतियोगिवैयधिकरण्यघटितमेव व्यापकत्वमत्र निवेशितं यथा संनिवेशे वैयर्थ्यविरहा
दतः स्वावच्छेदकत्वं। संयोगाभावनिष्ठप्रतियोगित्वेऽप्यक्षतमेवोक्तमित्याशयेन संयोगात्मकाभावस्याभिधानं तदघटित
व्यापकतायाः श्रयेऽन्ते तु गगनत्वविशिष्टवाच्यत्वाद्यभावस्य गगनत्ववाच्यत्वोभयत्वावच्छिन्नाभावादेर्यावदन्तर्ग
तत्वात्तस्य च हेत्वधिकरणीभूतगगनाद्यवच्छेदेन प्रतियोग्यसमानाधिकरणत्वादव्याप्तिरतः स्वविशिष्टपदं दत्तं
भिप्रायेणैव संयोगाद्यात्मकाभावे स्वत्रादिपदमुपात्तं। वस्तुतः सत्तावान्द्रव्यत्वात् गुणत्ववान्रूपत्वादित्यादौ काले
जन्यत्वेऽपि च हेतुसमानाधिकरणस्य सत्ताद्यभावस्य गुणत्वसामान्याभावस्य चैकेनापि संबंधेन आत्मगगनादौ नित्य

रूपेणाव्यक्तित्वाद्येत्यधिकरणावच्छेदेन तस्यैव सावर्दं तद्गतस्य प्रतियोगिसामानाधिकरण्यविरहादव्याप्तिः स्याद्यदि स्वविशि
ष्टपदं न स्यादिति दिक्। ननु धूमाद्यवच्छिन्ननिष्ठजलादिवृत्तित्वविशिष्टगोत्वाद्यभावस्याभावः धूमाभाव एव अभावप्रतियोगि
काभावाधिकरणकाभावस्याधिकरणस्वरूपत्वात्। तथा च धूमादौ साध्ये वन्ह्यादिहेतावतिव्याप्तिः। धूमाद्यभावस्य
हेत्वधिकरणावच्छेदेन गोत्वाद्यभावरूपप्रतियोगिसामानाधिकरण्यादत आह। जलादिवृत्तीति। न च तदभावस्य धूमा
त्वावच्छिन्ना द्यभावरूपत्वेपि जलादेर्न तादृशाभावाधिकरणत्वं। किंतु धूमाभावत्वावच्छिन्नाधिकरणत्वमेवेति न तत्सत्त्वे यापत्तिप्र
संग इति वाच्यं। एवं सत्यभावमात्रस्यैव प्रायेणाभेदप्रसंगात्। उक्तक्रमेणैवासंभवव्या×तिप्रसंगवारण×दिति भावः
ननु तथापि धूमवान्वन्हेरित्यादावतिव्याप्तिः। समनियताभावानामैक्यात् धूमाभावस्य वन्हिधूमोभयाभावादभिन्नस्य

"अयोगोलकान्यत्वाभावादश्चायोगोलकभेदत्वादिना भेदसामान्याभावादभिन्नस्य हेत्वधिकरणावच्छेदेनैव वह्न्यादिभे
दात्मकप्रतियोगिसमानाधिकरणत्वादिति चेदत्राहुः। यावत्पदस्य फलितः प्रतियोगिताविशेषणत्वेन साध्यव्यापकतावच्छेद
कीभूतयद्धत्प्रतियोगिताकाभावः तस्य स्वविशिष्टहेत्वधिकरणावच्छेदेन तत्प्रतियोगिताश्रयसामानाधिकरण्यं वि
वक्षितं। तथा च धूमादिसामान्याभावस्य धूमादिनिष्ठतादृशप्रतियोगिताकस्य धूमादिनिष्ठतादृशप्रतियोगिताश्रये
ण धूमादिना हेत्वधिकरणावच्छेदेन तत्प्रतियोगिताश्रयसामानाधिकरण्याविरहान्नातिव्याप्तिः। न चैवं। यत्समानाधि
करणा इत्यस्य वैयर्थ्यं। आत्मत्वसामान्याभावीयप्रतियोगिताया अपि साध्यव्यापकतावच्छेदकत्वात् तत्प्रतियोगिताकस्य
आत्मत्वसामान्याभावस्य तादृशप्रतियोगिताश्रयसामानाधिकरण्यविरहादयमात्मा ज्ञानादित्यादावव्याप्तिवा

(3 अभावे यावत्वासत्वादव्याप्तिरिति भ्रमेणाशंकते। न चेति।

रकत्वात् जलत्वादिव्यतिरेकविशिष्टेत्यादि ग्रंथस्तु वस्तुगतिमनुरुध्यैवोक्तस्तेन तादृशाभावस्य धूमाभावस्वरूपत्वेपि तस्य हेत्वधि करणावच्छेदेन साध्यव्यापकतावच्छेदकीभूतधूमनिष्ठप्रतियोगिताव्यक्त्याश्रयसामानाधिकरण्यविरहादेवातिव्याप्ति संभवेपि न क्षतिः। न च धूमत्वेन धूमाभावस्य धूमनिष्ठं यत्प्रतियोगित्वं तदेव धूमत्वेन प्रमेयसामान्याभावस्य प्रमेयसामा न्यनिष्ठप्रतियोगित्वं लाघवात् न तु तद्भिन्नं प्रतियोगित्वं गौरवात् इत्यतस्तद्विवक्षया व्यतीकार इति वाच्यं। स्वरूपसंबं धात्मिकायाः प्रतियोगितायाः सामान्याभावस्थलेपि प्रतियोगिभेदेनैव भिन्नत्वादिति सांप्रदायिकाः। वस्तुतः साध्य व्यापकतावच्छेदिकायाः स्वन्यूनवृत्तिधर्मानवच्छिन्नायाः यादृशप्रतियोगितायाः निरूपको योऽभावस्तस्य स्वविशि ष्टहेत्वधिकरणावच्छेदेन तादृशप्रतियोगिताश्रयसामानाधिकरण्यमेव वक्तव्यं। तथा च धूमादिसामान्याभाव

व्यापकत्वं ते मतेन ३

स्यधूमत्वादिना गमेयसामान्याभावानतिरेकेपि तदीयं प्रमेयसामान्यनिष्ठं प्रतियोगित्वं स्वन्यूनवृत्तिनैव धूमत्वादिधर्मेणा
वच्छिद्यते। न तादृशप्रतियोगिताश्रयसामानाधिकरण्यमुपादायातिप्रसंग इति युक्तमुत्पश्यामः। यत्तु समनियताभावे व्याप्य
वृत्ते धूमवान्वह्नेरित्यादावतिव्याप्तिवारणार्थं येन येन संबंधेन प्रत्येकं प्रतियोगिसामानाधिकरण्यं विवक्षितं। तथा च व्यभिचा
रमात्र एव यत्राधिकरणे व्यभिचारस्तदन्यत्वस्य स्वात्मकस्वरूपसंबंधेनापि साध्यव्यापकत्वात्तदभावस्य च हेत्वधिकरणा
वच्छेदेन तादृशान्यत्वस्वरूपसंबंधेन स्वप्रतियोगिसामानाधिकरण्याभावान्नातिव्याप्तिः। अत एव विषयतासंबंधस्य व्यापक
ताघटकसंबंधत्वेपि नित्यज्ञानेनेति सत्सविषयकत्वादित्यादौ नातिव्याप्तिः। नित्यज्ञानत्वाद्यभावस्य व्यापकताघटकसमवा
यसंबंधेन प्रतियोग्यसामानाधिकरण्यादिति मतं। तन्तुच्छं। घटत्वादिना वाच्यत्वाद्यभावस्य घटत्वादिना अयःपिंडान्य

घटत्वेन धूमाभावीयप्रतियोगित्वं स्वसमानाधिकरणत्वे सति स्वसमानाधिकरणाभावप्रतियोगिनात्तन्न धूमत्वेनानवच्छिन्नप्रतिया
गित्वारकं)

त्वाभावरूपतया तस्य व्यापकताघटके नायंःपिं ऽन्यनिरूपितस्वरूपसंबंधेन यावद्धेत्वधिकरणप्रतियोगिसामानाधिकरण्या
देवं विरहात् धूमवान्वह्नेरित्यादावतिव्याप्तिविरहाद्यावं तदित्यस्य स्वविशिष्टत्वस्य यत्समानाधिकरणेत्यस्य च व्यर्थतापा
तादितिदिक्॥ ॥ननु व्यधिकरणधर्मावच्छिन्नाभावासत्वेपि सर्वत्र सद्धेतौ घटत्वादिविशिष्टवाच्यत्वाद्यभावं गगनत्ववा
च्यत्वोभयाभावं वा समादाय प्रोक्तलक्षणासंभवः प्रतियोग्यवृत्तित्वेति मत्वे वे तो तु अनुपपत्तिः न च वैशिष्ट्यव्यासज्यवृत्ति
धर्मानवच्छिन्नत्वेन व्यापकतावच्छेदकीभूतप्रतियोगिताया विशेषणीयत्वात् नैवमिति वाच्यं व्यभिचारवारकत्वेन तादृशाधि
शेषणस्यास्य व्यर्थत्वात् । अन्यथा व्यधिकरणधर्मावच्छिन्नाभावसमानकालीनत्वेन हेतुविशेष्येव ग्रंथावतारणं कृतोन सम
र्थयेदतो लक्षणांतरमाह । यत्समानाधिकरणानामित्यादि वह्निमान् धूमात् सत्तावान् द्रव्यत्वात् इत्यादावव्याप्तिः साध्यव्याप
कप्रतियोगितानां जलत्वविशिष्टद्रव्यत्वाभाव गुणत्वविशिष्टसत्ताद्यभावानां स्वविशिष्टहेत्वधिकरणावच्छेदेन प्रतियो

गितावच्छेदकीभूतजलत्वविशिष्टद्रव्यत्वावच्छिन्नगुणत्वविशिष्टसत्ताद्यवच्छिन्नसामानाधिकरण्याभावादत उक्तं रू-
पावच्छिन्नेति। तथा च जलत्वविशिष्टद्रव्यत्वत्वादेः साध्यव्यापकतानवच्छेदकत्वाददोषः। यत्तु साध्यव्यापकप्रतियोगिकस्य
घटत्वेन वह्न्यभावस्यैव यावद्धेत्वधिकरणघटत्वावच्छिन्नसामानाधिकरण्याभावादसंभवापत्तिरतो व्यापकतावच्छेदकरूपा-
वच्छिन्नेतीति तदंत्यं तमसत्। घटत्वेन वह्न्यभावस्यैव वह्नित्वेन घटाभाववत्तयाऽस्यापि यावद्धेतुप्रतिस्वप्रतियोगितावच्छेदकी-
भूतवह्नित्वावच्छिन्नसमानाधिकरणत्वात्। ननु समवायित्वस्य वाच्यत्वव्यापकतानवच्छेदकत्वात्तदवच्छिन्नवाच्यत्वा-
द्यभावस्य येन हेतुना घटकत्वादाह येत्वत्वादिनेति। रूपमित्यादि। येन संबंधेन हेतुस्तेन संबंधेन हेतुतावच्छेदका-
वच्छिन्नहेत्वधिकरणवृत्तित्वमभावे ग्राह्यं। तेनायमात्मा ज्ञानात् घटान्यत्वविशिष्टात्मघटसंयोगादित्यादौ

आत्मत्वसामान्याभावस्य तथात्वेपि नाव्याप्तिः। एवं येन संबंधेन व्यापकता तत्संबंधावच्छिन्नप्रतियोगिताकाभावस्य स्वप्रतियोगि
तावच्छेदकसंबंधेन प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यं बोध्यं॥ अतो न व्यधिकरणधर्मावच्छिन्नाभावस्य
असत्वेपि व्यधिकरणसंबंधावच्छिन्नवाच्यत्वाद्यभावमादाय लक्षणसमन्वयसंभवात्प्रतियोग्यवृत्तिश्चेति ग्रंथावतारानु
पपत्तिः। न वा जलत्वादेः समवायेन साध्यतायां महाकालत्वादित्यादावतिव्याप्तिः। प्रतियोगितावच्छेदकावच्छिन्न
सामानाधिकरण्यं च स्वविशिष्टहेत्वधिकरणावच्छेदेन बोध्यं। तेन द्रव्यं सत्वादित्यादौ द्रव्यत्वाद्यभावस्य का
ले हेतुमति प्रतियोगिसमानाधिकरणत्वेपि नातिव्याप्तिः। इदं त्वत्रावधातव्यं। साध्यवन्निष्ठाभावप्रतियोगिता
याः सामानाधिकरण्येनानवच्छेदकत्वमेव साध्यव्यापकतावच्छेदकत्वमग्रपूर्वलक्षणे च गवेस्यं। ननु प्रति

योगित्वे व्यधिकरणघटितं। तथा सति व्यधिकरणधर्मावच्छिन्नाभावासत्वेऽपि सर्वं प्रमेयमित्याकारकजन्ययत्किंचिद्बुद्धिविषयत्व

सामान्याभावमादायैव सर्वज्ञलक्षणसमन्वयसंभवे प्रतियोग्यवृत्तित्वेति गंथावतारानुपपत्तेः। जन्यज्ञानव्यक्तिविषयत्व

स्य तादृशज्ञानदयोर्गामेव सत्वेन तदसत्वदशायामेव तादृशज्ञानविषयत्वाभावस्य हेतुसमानाधिकरणत्वात्। एवं चात्र

स्वविशिष्टपदं नकपिसंयोगाद्यात्मकाभावं गगनत्वादिविशिष्टवाच्यत्वाद्यभावं वा समवायकपिसंयोगाभाववान्मेयत्वा

दित्यादावव्याप्तिवारकं कपिसंयोगाभावत्वादेरुक्तव्यापकतावच्छेदकत्वाभावात्। हेतुमति काले वर्तमानस्य सत्वसा

मान्याभावस्यापि निरुक्तरूपत्वशालित्वात्तस्य च आत्मादावसत्वेन यावद्धेत्वधिकरणप्रतियोगितावच्छेदकावच्छिन्नसा

मानाधिकरण्यविरहात्सत्तावान्द्रव्यत्वादित्यादावव्याप्तिवारकमेव स्वविशिष्टपदं। न च साध्यतावच्छेदकं संबंधेन

साध्यतावच्छेदकधर्मावच्छिन्नप्रतियोगिताको अभावो यद्धेत्वधिकरणावच्छेदेन स्वावच्छेदकसंबंधेन प्रतियोगितावच्छेदका
वच्छिन्नसमानाधिकरणस्तत्वमित्येव सम्यक्। वाच्यत्वादिभाघटाभावमादायैव वाच्यं ज्ञेयत्वादित्यादौ लक्षणसमन्व
यादिति वाच्यं। स्वरूपसंबंधेन प्रमेयत्वावच्छिन्नाभावाप्रसिध्या प्रमेयवान् वाच्यत्वादित्यादावव्याप्तेः। गुरुधर्मावच्छिन्नप्र
तियोगिताकत्वाप्रसिध्या प्रमेयवह्निमान् धूमादित्यादावव्याप्तेः। वृत्तिनियामकसंबंधस्य प्रतियोगितानवच्छेदकत
या गोमी चैत्रत्वादित्यादावव्याप्तिश्चेति दिक्। ननु वह्नित्वेन धूमवद्वृत्तिसामान्याभावो धूमीयसंयोगसंबंधेन द्रव्य
सामान्याभावो वा धूमाभाव एव तथा। अयोगोलकभेदतदभावान्यतरत्वेन अयोगोलकावृत्तेरभावो अयोगोलकान्य
त्वस्वरूपसंबंधेन भेदसामान्याभावो वा अयोगोलकान्यत्वाभाव एव समनियताभावानामैक्यात्। तथा च धूमाद्यभा

वस्य प्रतियोगितावच्छेदकं यद्वह्नित्वादिकं तदवच्छिन्नेन समं यावद्धेत्वधिकरणे धूमाद्यभावस्य प्रतियोगिसमानाधिकरणत्वात् ।
धूमवान्वह्नेरित्याद्यव्याप्तिः । सामान्यधर्मेणाविशेषाभावाभ्युपगमे तु सुतरां तथा । धूमत्वेन धूमाद्यभावानामेव प्रमेय
त्वादिना धूमाद्यभावतया तस्य च प्रतियोगितावच्छेदकीभूतप्रमेयत्वावच्छिन्नसामानाधिकरण्यादिति चेत् अत्रापि यावत्पदस्य
फलतः प्रतियोगिताविशेषणतया साध्यव्यापकतावच्छेदकरूपावच्छिन्नयद्यत्प्रतियोगिताको यत्समानाधिकरणोऽभावः
स्वविशिष्टहेत्वधिकरणावच्छेदेन तत्तत्प्रतियोगितावच्छेदकावच्छिन्नसमानाधिकरणत्वमिति पर्यवसितार्थः । तथा च धूमा
दिनिष्ठतादृशधूमत्वाद्यवच्छिन्नप्रतियोगिताकाभावस्य धूमादिनिष्ठं यत्प्रतियोगित्वं तदवच्छेदकीभूतधूमत्वाद्यवच्छिन्ने
न साध्यके हेत्वधिकरणावच्छेदेन सामानाधिकरण्यविरहान्नातिप्रसंग इति संप्रदायः । वस्तुतः अत्रापि साध्यव्याप

कतावच्छेदकरूपावच्छिन्नयास्वन्यूनवृत्तिधर्मानवच्छिन्नयायादृशीप्रतियोगितयानिरूपितोऽभावस्तादृशप्रतियोगि
तायायदवच्छेदकं तदवच्छिन्नसामानाधिकरण्यं वक्तव्यं धूमत्वादिना धूमाद्यभावस्तु न प्रमेयत्वादिना धूमाद्यभावः सा
मान्यधर्मेण विशेषाभावानभ्युपगमात् तदभ्युपगमे तु यादृशप्रतियोगिताकाभावे तादृशप्रतियोगितावच्छेदकावच्छिन्न
वद्वृत्तित्वस्य जगद्वृत्तिभिन्नत्वस्य च द्वयोर्व्यतिरेकः साध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभाववानां तादृश
प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यं वाच्यमतो न दोष इति ध्येयं॥ ४ ॥ ४४ ॥
चक्रवर्तिलक्षणमाह। केचिदिति। अनवच्छेदकमिति। यत्साध्यतावच्छेदकमित्यत्र परेणान्वितं। घटत्वादिना वह्न्यभावमा
दाय वह्निमान्धूमादित्यादौ लक्षणसंगतिः। व्यभिचारिणि तु हेतुसमानाधिकरणस्य साध्यसामान्याभावस्यैव प्रतियो

गितावच्छेदकं साध्यतावच्छेदकमतो नातिव्याप्तिः। कपिसंयोगि एतद्वृक्षत्वादित्यादावव्याप्तिवारणार्थं व्याप्यवृत्तेरिति। वन्हित्वा
दिना घटादेरभावमादायाव्याप्तिरतः साध्येति। अत्र च प्रतियोगितासाध्यतावच्छेदकसंबंधावच्छिन्ना ग्राह्या। तेन समवायादिसं
बंधेन वन्ह्याद्यभावस्य हेतुसमानाधिकरणस्य प्रतियोगितावच्छेदकत्वेपि वन्हित्वादेर्नासंभवः। प्रतियोगिवैयधिकरण्यप्र
वेशे वाच्यं ज्ञेयत्वादित्यादावव्याप्तिः। प्रतियोगिव्यधिकरणसाध्याभावाप्रसिद्धेरतस्तत्परित्यागः। व्याप्यवृत्तित्वं तु निरव
च्छिन्नहेत्वधिकरणवृत्तिकत्वं हेत्वधिकरणयत्किंचिद्व्यक्तिवृत्त्यभावप्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकं य
द्भाववत्त्वं तत्त्वं वा। एवं चैतदुक्ताभावमेव हेतुसमानाधिकरणस्योक्तं न तु स्वातंत्र्येण तद्विशेषणं वैयर्थ्यात्। यत्किं
चित्त्वनिर्वेशाच्च। कपिसंयोगाभावस्य हेत्वधिकरणीभूतद्रव्यनिष्ठाभावप्रतियोगित्वेपि कपिसंयोगी सत्त्वादित्या

नास्ति व्याप्तिः ॥ ननु समनियताभावानामैक्यात् घटत्वेन वन्ह्यभावस्यैव वन्हित्वेन घटाभाववत्य हेतुसमानाधिकरणस्य तादृशस्यैव सा
ध्यप्रतियोगिताकाभावस्य प्रतियोगितावच्छेदकं वन्हित्वादिकमित्य व्याप्तिरतः समनियताभावैक्यमतेपि निरुक्तिमाह । हेतुसमा
नाधिकरणस्येति । व्यापकत्वेनाभावस्य प्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकं यत्साध्यतावच्छेदकमिति योजना । नन्व
त्रापि हेतुसमानाधिकरणस्य वन्हित्वेन वन्हिधूमोभयाभावस्य वन्हित्वेन पर्वतीयवन्हेरभावस्य च प्रतियोगितायाः समानाधि
करणं सदेव वन्हित्वमवच्छेदकमित्यः व्याप्तिः तादृशप्रतियोगितायाः अन्यूनवृत्तित्वे सति यदवच्छेदकं तदन्यत्वोक्तावपि । तथा
पर्वते वन्हित्वेन तार्णतारणोभयं नास्तीति प्रतीतिसिद्धस्यैव तादृशाभावस्य प्रतियोगितावच्छेदकत्वाद्वन्हित्वस्य न च तादृ
शाभावप्रतियोगितावच्छेदकत्वं न वन्हित्वमात्रपर्याप्तं किंतु तार्णतार्णोभयत्वेपि । अन्यथा तादृशप्रतियोगितावच्छेद

कीभूतवह्नित्वावच्छिन्नप्रतिपर्वतादौ तादृशाभावाप्रसङ्ग इति वाच्यं। सौन्दडमते प्रतियोगितावच्छेदकीभूतधर्मावच्छिन्नवत्तामात्रस्याभावाविरोधित्वा
त् घटवति घटत्वेन पटाभावस्याप्यलापापत्तेः। किन्तु प्रतीतिबलाद्व्यधिकरणधर्मस्य प्रतियोगितावच्छेदकत्वमिष्टौ सत्त्वं प्रतियोग्यंशोप
कारीभूतं यत्र प्रकारीभूतधर्मविशिष्टप्रतियोगितावच्छेदकावच्छिन्नेनैव सार्धमापत्त्या अभावस्य विरोधित्वं वाच्यं तदेतद्वह्नित्वादिना
तार्णात्वेनाभियाभावादिसत्त्वेपि न क्षतिकरं। अत एव द्रव्यत्वेन वह्निर्नास्ति वह्नित्वेन तद्वह्निर्नास्तीति प्रतीत्या सामान्यधर्मेण विशे
षाभावोऽभ्युपगम्यते। न च तत्र वह्नित्वस्यैव प्रतियोगितावच्छेदकत्वं भासते द्रव्यत्वस्य तु वैशिष्ट्यमात्रं विषय इति वाच्यं। वह्नि
मान् यत्नित्येवं निर्णये सत्त्वेपि द्रव्यत्वेन वह्निर्नास्तीति प्रत्ययात् द्रव्यत्वस्यैवावच्छेदकतयाभानात्। अन्यथा वह्नित्वावच्छि
न्नवह्निनिष्ठप्रतियोगित्वप्रकारेण यन्न्यभावबुद्धिं प्रति वह्नित्वेन वह्निविशिष्टनिश्चयस्यैव प्रतिबन्धकत्वात् तादृशप्रती

स्यसंभवापत्तेः। अस्माकं तु द्रव्यत्वावच्छिन्नवन्हिष्ठप्रतियोगिताकत्वेन वन्ह्यभावबुद्धिं प्रति द्रव्यत्वेन वन्हिविशिष्टनिश्चयस्ये
व विरोधित्वात्तदसत्वादेव तादृशाभावप्रतीतिसंभवात् इत्यतो लक्षणांतरमाह। प्रतियोग्यधिकरणस्येति। केचित्तु सामानाधि
करण्यमभेदः तथा च हेतुसमानाधिकरणाभावीयस्वाभिन्नप्रतियोगितायाः अवच्छेदकं यद्यत्तत्तदन्यत्वं साध्यतावच्छेदके विवक्षि
तं प्रतियोगित्वं हि स्वरूपसंबंधविशेषः। अत एव सामान्याभावस्थले प्रतियोगितावच्छेदकस्वरूप एव। न तु प्रतियोगिस्वरूपः अननुगमा
त्। अभेदेन आधाराधेयभावानुपपत्तेश्च सामान्यधर्मेण विशेषाभावस्थले च प्रतियोग्यंशे प्रकारीभूतधर्म एव तथा न तु सामान्यधर्मः
अतिप्रसक्तत्वात् व्यधिकरणधर्मावच्छिन्नाभावस्थले तु प्रतियोगितावच्छेदकादिस्वरूपं न तु प्रतियोगित्वं किंचिदतिरिक्तमेव। अन्य
था प्रतियोगितावच्छेदकविशिष्ट प्रतियोगिनेव साधर्म्यभावस्य विरोधित्वात्। तदवच्छिन्नवत्तितादृशाभावासत्व प्रसंगात् इति वा दोष्य

यत्नतिरिक्तायां प्रतियोगितायामेव। अन्यथा समनियताभावैक्येन निखिलत्वधिकरणधर्मावच्छिन्नाभावस्यैव गगनाभावात्मकतया
गगनाभावस्वीकर्तॄणां चिंतामणिकाराणां तदनंगीकारानुपपत्तेः। इत्थं च पर्वते वह्नित्वेन ताणीतार्णभिन्नवह्निर्नास्तीति प्रतीतिबला
त्। तादृशाभावप्रतियोगितावच्छेदकत्वस्य वह्नित्वे सत्त्वेपि तादृशप्रतियोगित्वं न वह्नित्वरूपं किंतु तादृशोभयाभिन्नमात्रवृ
त्तिमेव वा। तथा च स्वाभिन्ना या साधनवच्छिन्नाभावप्रतियोगितायावदवच्छेदकं तदन्यत्वस्य वह्नित्वे सत्त्वान्न तस्य धूमव्यापकता
वच्छेदकत्वहानिः। नन्वत्र लक्षणे हेत्वधिकरणवृत्तित्वमभावस्य संबंधमात्रेण न वाच्यं वह्निसामान्याभावस्यापि कालिका
दिसंबंधेन धूमवतिसत्त्वादव्याप्त्यापत्तेः। नापि दैशिकविशेषणतया घटाभिसंयुक्तत्वादित्यादावतिव्याप्त्यापत्तेः घटत्व
रूपसाध्याभावस्य दैशिकविशेषणतया वृत्तित्वविरहादित्यतो लक्षणांतरमाह। प्रतियोगिव्यधिकरणस्य चेति प्राहुः

केचित्तु पूर्वोक्तव्याप्तिपञ्चकभिन्नत्वं यत्किंचिद्घटितत्वेन दुर्वचमतः प्रतियोगिव्यधिकरणस्यैवेतिलक्षणांतरमुक्तमित्यप्याहुः
हेतुसमानाधिकरणस्य प्रतियोगिव्यधिकरणस्यैवाभावस्य प्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकं यत्
साध्यतावच्छेदकमिति योजना। अथात्र प्रतियोगिव्यधिकरणत्वं न स्वप्रतियोगिसमानाधिकरणभिन्नत्वं सम
नियतभावानामभिन्नतया घटत्वेन घटाभावादेरपि घटत्वेन प्रमेयसामान्याभावस्वरूपत्वात्तस्य च प्रमेयात्मक
प्रतियोगिसमानाधिकरणतया तदन्यत्वासंभवात्। अत एव स्वप्रतियोगितावच्छेदकावच्छिन्नसमानाधिकरणो यो य
स्तदन्यत्वमपि तथा घटत्वेन घटाभावो ऽपि प्रमेयत्वादिना घटाद्यभावस्य द्रव्यत्वेन घटपटोभयाभावस्य वा तादात्म्या
पगमादप्रसिध्यापत्तेः व्यधिकरणधर्मावच्छिन्नाभावस्यापि तत एव वारणसंभवे सामानाधिकरण्ये तस्यैव

व्यप्यापाताच्च। न च साध्यतावच्छेदकसंबंधेन यादृशप्रतियोगिताकाभावानधिकरणं हेत्वधिकरणं तादृशप्रतियोगि
त्वं प्रतियोगित्वं तार्थः तथा च वह्नित्वेन घटाभावीयं च यन्निष्ठं प्रतियोगित्वमपि तादृशमनतत्सदवच्छेदकत्वं वह्नित्वे
प्यस्तीति सामानाधिकरण्यपदं तेन हेतौ प्रतियोगितायाः सामानाधिकरण्यावच्छेदकाप्रसिद्ध्या तद्भिन्नप्रति
योगितैव द्भेलेन घटकेति वाच्यं। विशिष्टसत्तावान् जातेरित्यादावतिव्याप्तेः। गुणादीनामपि विशिष्टसत्तानिष्ठ
प्रतियोगित्वाश्रयाधिकरणत्वात् घटःवान् महाकालत्वादित्यादावव्याप्तिप्रसंगाच्च हेतुमतो महाकालस्य सा
ध्यताघटककालिकसंबंधेन घटाभावप्रतियोगिताश्रयाधिकरणतया प्रतियोगिव्यधिकरणाभावाप्रसिद्धे
रिति चेदत्राहुः साध्यतावच्छेदकसंबंधेन स्वाश्रयवृत्ति स्वावच्छेदकधर्मावच्छिन्नाधिकरणयावद्धेत्वधिकरणीका

यावत्यः प्रतियोगितास्तदन्यप्रतियोगित्वं प्रतियोगित्वान्तार्थः (हेत्वाच्च वह्नित्वेन घटाभावीयं घटनिष्ठप्रतियोगित्वमपि
तादृशमतस्तदवच्छेदकत्वं) तथाच वह्नित्वेन घटाद्यभावस्यापि घटादिनिष्ठप्रतियोगितातादृशीति तदवच्छेदकत्वं वह्नित्वेऽ
स्तीत्यतः सामानाधिकरण्यपदं। घटवान्महाकालत्वादित्यादौ तु गगनाभावीयं गगननिष्ठमेव तादृशं प्रतियोगित्वं सुल
भमिति न कोऽपि दोषः। वस्तुतो धूमवति वह्नित्वेन घटो नास्तीतिवत् धूमवान् वह्नित्वेन घटवान्न किं तु घटत्वेनेति प्र
तीतिबलात् व्यधिकरणधर्मावच्छिन्नावच्छेदकतानिरूपितप्रतियोगिताकान्योन्याभावोऽप्यस्ति अत एव समवायतया
वाच्यत्ववह्नेर्देशो घटादौ पक्षधरमिश्रैः स्वीकृतः। तथाच यादृशप्रतियोगितावच्छेदकावच्छिन्नीयत्वेन साध्यताव
च्छेदकसंबंधेन यादृशप्रतियोगिताश्रयानधिकरणत्वं हेतुमतस्तादृशप्रतियोगितासमानाधिकरणावच्छिन्नत्वाव
(घटत्वावच्छिन्नीयत्वेन घटाधिकरणत्वाभावो गगनक्षणघटकः घटत्वावच्छिन्नीयत्वं च घटत्वावच्छिन्नाधेयत्वनि
रूपितत्वं) ३०

च्छिन्नप्रतियोगिताकतादृशप्रतियोगितावच्छेदकत्वाभाववत्त्वं तादृशप्रतियोगितावच्छेदकान्यत्वं वा साध्यतावच्छेदके वि
वक्षितं। तथा च घटादिनिष्ठस्य वह्नित्वेन घटाद्यभावप्रतियोगित्वस्यापि तादृशत्वेन वह्नित्वस्य तदवच्छेदकत्वादव्याप्ति
रतः सामानाधिकरण्येनेत्युक्तं। तथा च वह्नित्वस्य तादृशप्रतियोगितावच्छेदकत्वेपि तादृशी तादृशप्रतियोगितासमानाधिकर
णव्यक्तित्वरूपव्यधिकरणधर्मेण तादृशप्रतियोगितावच्छेदकभेदस्य तादृशप्रतियोगितावच्छेदकत्वाभावस्य च तत्र सत्वान्ना
व्याप्तिः। कालो घटवान् महाकालत्वादित्यादौ तु घटादिसामान्याभावप्रतियोगितायाः तथात्वेपि पटत्वेन घटाभावप्रतियो
गिताया एव लक्षणसंगतिः। कालः पटत्वेन घटाभा न तु घटत्वेनेत्यनुभवात् वह्नित्वादिसामान्यधर्मेण महानसीयव
ह्न्याद्यभावसत्त्वे तु यादृशप्रतियोगितावच्छेदके इत्यत्र अवच्छेदकत्वम् अनतिरिक्तवृत्तित्वं ग्राह्यं। तच्च तदतिरिक्तवृत्ति
त्वे सति तत्समानाधिकरणं यत्तदन्यत्वं। नातो व्यधिकरणधर्मावच्छिन्नप्रतियोगितायास्तद्वारणसंभवे सामानाधि

करण्यदलवैयर्थ्यमित्यस्मद्गुरुचरणाः। यत्तु यत्प्रतियोगितावच्छेदकविशिष्टस्य यत्प्रतियोगिताश्रयस्य च द्वयोस्साध्यतावच्छे
दकसंबंधेन अनधिकरणं हेत्वधिकरणं तादृशप्रतियोगित्वं प्रतियोगित्वं तार्थः। तथा च वह्नित्वेन घटाभावस्य घटत्वा
दिनिष्ठप्रतियोगितायाः अपि तादृशत्वाद्वह्नित्वादेस्तदवच्छेदकत्वमादाय अव्याप्तिरतः सामानाधिकरण्येनेति प्रागुक्ता
र्थकं। एतन्मते च सामान्यरूपेण विशेषाभावोऽभ्युपगमः। नातो वह्नित्वेन तद्वह्न्यभावमादाय अव्याप्तिः। न च स्वरूपसंबंधा
त्मकप्रतियोगितायाः प्रतियोगिभेदेन भिन्नत्वाद्वह्निमान्धूमादित्यादौ अव्याप्तिः। वह्निसामान्याभावीयं यन्महानसीयव
ह्निनिष्ठं प्रतियोगित्वं तदवच्छेदकीभूत। वह्नित्वविशिष्टस्य तत्प्रतियोगिताश्रयीभूतस्य महानसीयवह्न्यादेश्च द्वयोरनधिक
रणत्वस्य हेतुमति सत्त्वादिति वाच्यं। प्रतियोगिव्यक्तीनां भेदेऽप्येकधर्मावच्छिन्नप्रतियोगितायाः लाघवेनैक्यस्वीकारात्। न
च कालो घटवान्महाकालत्वादित्यादौ तादृशप्रतियोगित्वाप्रसिद्ध्या अव्याप्तिः। गगनाद्यभावीयप्रतियोगिताश्रयीभूत

गगनस्याधिकरणाप्रसिद्ध्या तादृशप्रतियोगितायाः लक्षणाघटकत्वादिति वाच्यं । महाकालान्यत्वविशिष्टघटाभावस्य तादृशवि
शिष्टघटत्वावच्छिन्नप्रतियोगिताव्यक्तेरेव तथात्वात् । यत्प्रतियोगितावच्छेदकविशिष्टयत्प्रतियोगिताश्रयोभयत्वं वा हेत्वधिकरण
य किंचिन्निष्ठाभावप्रतियोगितावच्छेदकं तादृशप्रतियोगिताया एव निवेश्यतया घटत्वेन गगनाभावादिकमादायैव तत्र लक्षणसंभवा
च्चेति तन्न । प्रतियोगिभेदेपि प्रतियोगितावच्छेदकाभेदेन प्रतियोगिताया अभेदस्तदा वह्नित्वेन घटाभावस्य या वह्नित्वावच्छिन्ना
घटनिष्ठा प्रतियोगिता सैव वह्नित्वेन वह्निधूमोभयाभावस्यापि वह्नित्वावच्छिन्ना धूमादिनिष्ठा प्रतियोगिता लाघवात् । त
था च सामानाधिकरण्ये सत्स्य नैयत्यं दुर्वारं । वह्नित्वेन घटाभावीयं यद्घटनिष्ठं प्रतियोगित्वं तदवच्छेदकीभूतं वह्नित्ववि
शिष्टस्य तादृशप्रतियोगिताश्रयीभूतवह्निधूमादेश्च द्वयोरधिकरणत्वस्य सर्वत्रैव हेतुमति सत्त्वेन वह्नित्वरूपस्याधि
करणधर्मावच्छिन्नप्रतियोगितायाः लक्षणाघटकत्वादिति दिक् । एवं चेति तथा च अव्यभिचरितत्वस्य पारिभाषिकत्वा

नादरेपि न क्षतिरिति भावः। वह्नित्वाद्यवच्छिन्नघटाभाववति धूमादेर्वर्तमानत्वादत उक्तं साध्याभावेति। अत्र साध्याभावो व्याप्यवृत्ति
र्बोध्यः। एवं परत्रापि विशिष्टेति। महानसीयत्वादिविशिष्टवह्नित्वावच्छिन्नप्रतियोगिताकेत्यर्थः। ननु विशिष्टस्यातिरिक्तत्वान्म
हानसीयत्ववह्नित्वयोर्वैशिष्ट्यस्यैव वा परंपरयातन्नावच्छेदकत्वान्नेदं पदोपादेयमत आह। हृदत्ववह्नित्वेति। ननु व्याप्यवृत्तित्वघटि
तलक्षणयोः संयोगीसत्त्वादिष्वत्रातिव्याप्तिः। स्वसमानाधिकरणाभावप्रतियोगित्वरूपस्यावच्छिन्नवृत्तिकान्यत्वरूपस्य वा
व्याप्यवृत्तित्वस्य संयोगाभावेऽसत्त्वादत आह। सत्त्ववतीति। तथा च हेतुसमानाधिकरणस्य व्याप्यवृत्तेरित्यं तेन निरवच्छि
न्नहेत्वधिकरणवृत्तित्वं हेत्वधिकरणीभूतयत्किंचिद्व्यक्तिनिष्ठाभावाप्रतियोगित्वं वा अभावस्य विवक्षितमिति भावः। गुरुध
र्मेण साध्यतायां व्यभिचारिण्यतिव्याप्तिवारणाय पारिभाषिकावच्छेदकत्वानुसरणस्यावश्यकत्वे व्याप्यवृत्तित्वस्य गर्भकृत निरु
क्तावप्रवेशेऽपि न क्षतिरित्याशयेनाह। वक्ष्यमाणं वेति। यथाश्रुतस्य प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वस्योक्तौ सत्ता

वाज्ञाते रित्यादावव्याप्तिः। तादृशप्रतियोगितावच्छेदकीभूतविशिष्टसत्ताया अनतिरिक्तवृत्तित्वात्तन्नावस्येत्यतो वक्ष्यमाणमिति सिद्धान्तल
क्षणे वक्ष्यमाणमित्यर्थः। तथा च हेतुमन्निष्ठाभावीय यत्संबंधावच्छिन्नप्रतियोगितायाः सामानाधिकरण्येनावच्छेदकं यद्धर्म
विशिष्टसंबंधिनिष्ठाभावीय तत्संबंधावच्छिन्नप्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकं तदेव पारिभाषिकावच्छेदकं
तदन्यत्वं साध्यतावच्छेदके वाच्यमिति भावः। ननु एतादृशं गुणसामान्याभावस्य संयोगवति घटादौ सत्त्वात् गुणत्वस्य संयोगत्व
विशिष्टसंबंधिनिष्ठाभावीय यत्संबंधावच्छिन्नप्रतियोगितानवच्छेदकत्वविरहात् तमादाय संयोगत्वस्य पारिभाषिका
वच्छेदकत्वसंभावनापीत्यत आह। गुणवृत्तित्वेति। गुणासमवेतत्वेत्यर्थः। घटादावेतादृशायामपि गुणासमवेत
स्य द्रव्यत्वादेः सत्त्वान्न तदभाव इति भावः। संयोगिगुणान्यत्वे सति सत्त्वादित्यादौ तु गुणवृत्तित्वमादाय संयोगत्वस्य न
पारिभाषिकावच्छेदकत्वं। संभवति गुणावृत्तित्वावच्छिन्नाभावस्य हेतुसमानाधिकरणत्वादतः संयोगसाध्यकव्य

भिचारिमात्रे यद्धर्ममादाय संयोगस्य पारिभाषिकावच्छेदकत्वं तद्धर्ममाहाद्द्रव्यमात्रेति। द्रव्यान्यसमवेतेत्यर्थः। उक्ताभावाना
मव्याप्यवृत्तित्वे संयोगात्मकस्वप्रतियोग्यधिकरणवृत्तित्वेन कादाचिद्गुणत्वादिरूपाणां तत्प्रतियोगितावच्छेदकानां संयो
गत्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकत्वं न स्यात्तदेव नास्तीति तेषां व्याप्यवृत्तित्वात्संयोगात्मकस्वप्रति
योग्यनधिकरणवृत्तित्वादेतावन्मात्रस्य चनाव्याप्यवृत्तीत्युक्तं॥ छ ॥ छ ॥ छ ॥ छ ॥
श्रीगुरुभ्यो नमः। प्रगल्भलक्षणं दूषयितुमुपन्यस्यति। साध्यतावच्छेदकेति। स्वपदं विशिष्टहेतुपरं। अभावश्च यद्धर्मावच्छि
न्नसमानाधिकरणसाध्याभाववत्त्वावच्छेदेन साध्यतावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यं तद्धर्मवत्त्वं पर्यवसितं। अ
वच्छेदकत्वं चात्रानतिरिक्तवृत्तित्वं। व्यभिचारिणि तद्धेतुसमानाधिकरणस्य साध्यसामान्याभावस्यैव साध्य

सामानाधिकरण्यविरहान्नातिप्रसंगः। विशिष्टसत्तावाञ्जातेरित्यादौ यावन्त एव हेतुसमानाधिकरणसाध्याभा
वस्य सत्तारूपसाध्यसमानाधिकरण्यादिति व्याप्तिरतः साध्यतावच्छेदकावच्छिन्नेति। तथा च विशिष्टसत्ताभावस्यैव
तादृशस्य विशिष्टसत्तारूपसाध्यसमानाधिकरणत्वविरहान्नातिप्रसंगः। अत्र साध्यसामानाधिकरण्यं येन संबंधेन
साध्यता तेन संबंधेन साध्यस्याधिकरणे दैशिकविशेषणतया वृत्तित्वरूपं बोध्यं। तेन द्रव्यत्वादिसमानाधिकरणस्य
ज्ञानाद्यभावस्य विषयतया ज्ञानस्याधिकरणे वृत्तावपि समवायेन ज्ञानसाध्यके द्रव्यत्वादिहेतौ नातिव्याप्तिः। न वा कालः
प्रमेयत्वादित्यादौ सर्वेषामेव साध्याभावानां साध्यवति काले कालिकसंबंधेन वृत्तावप्यतिप्रसंगः। किंतु साध्याभा
वनिष्ठहेतुसामानाधिकरण्यमपि हेत्ववच्छेदकसंबंधेन प्रकृतहेतोर्यदधिकरणं तत्र विशेषणतया वृत्ति
मत्त्वरूपं बोध्यं। तेन अयमात्मा ज्ञानादित्यादौ विषयतया ज्ञानस्य हेतोरधिकरणे वर्तमानस्यात्मत्वसा

मान्याभावस्यापि द्रव्यं विशिष्टसत्त्वादित्यादौ च सत्ता समानाधिकरणस्य द्रव्यत्वसामान्याभावस्य साध्यसामानाधिकरण्यविरहेपि
नाव्याप्तिः। न वा कालः कालपरिमाणादित्यादौ हेत्वधिकरणे काले कालिकसंबंधेन वर्तमानस्य कालत्वादिसामान्याभाव
स्यापि साध्यवति दैशिकविशेषणतया। वृत्तिमत्त्वविरहेपि क्षतिः। साध्याभावस्य एवोक्तद्वितीयरीत्या बोध्यः। तेन व्यधि
करणधर्मावच्छिन्नाभावासत्त्वेपि साध्यस्याविशिष्टाभावादिकमादायैव लक्षणासंभवान्न प्रतियोग्यवृत्ति[illegible]त्वादि
ग्रंथावतारानुपपत्तिः। कपिसंयोगी सत्त्वादित्यादौ तु कपिसंयोगाभावस्य साध्यसमानाधिकरणत्वेपि द्रव्यमा
त्रसमवेतत्वाद्यवच्छिन्नप्रतियोगिताकाभावस्य साध्यसामानाधिकरण्यविरहान्नातिव्याप्तिः। कालिकसंबंधाव
च्छिन्नप्रतियोगिताकाकाशाभावस्याभावे साध्ये यत्र प्रमेयत्वादिहेतुः तत्र हेतुमपि दैशिकविशेषणतया
वर्तमानस्याकाशाभावाद्यात्मकस्य साध्याभावस्य साध्यवति दैशिकविशेषणतयावर्तनावपि हेतुसमाना

धिकरणस्य नित्यत्वादिसामान्याभावस्यापि निरुक्तसाध्याभाववत्त्वात्तस्यैव साध्यसामानाधिकरण्यविरहान्नातिव्याप्तिः
यत्समानाधिकरणेति। यत्समानाधिकरणसाध्याभावप्रमा सामान्य इत्यर्थः। तेन धूमवान्वह्नेरित्यादौ व्यधिकरणधर्मावच्छि
न्नसाध्याभावप्रमाव्यक्तेः साध्यवत्ताज्ञानाविरोधित्वेऽपि साध्यसामान्याभावप्रमाया एव साध्यवत्ताज्ञानविरोधित्वान्नाव्याप्तिः
व्यधिकरणधर्मावच्छिन्नसाध्याभावस्य साध्यसामान्याभावत्वभ्रमदशायां पर्वतो न वन्हिमानित्याकारकसाध्यवत्ताज्ञान
विरोधित्वादसंभवः। स्यादेतत्ः प्रमात्वोपादानात् प्रमात्वं चात्र भ्रमसामान्यभिन्नत्वं। तेन नैतादृशाबुधेरव्यवच्छेदः। अतः प्रमाया
उक्तदोषतादवस्थ्यं। ह्रदादौ वन्हिसामान्याभावप्रमायाः साध्यवत्त्वधीविरोधित्वादव्याप्तिरतो यत्समानाधिकरणेति
फलतः प्रमाविशेषणं। तथा च यद्धर्मावच्छिन्नवह्निरोध्यकसाध्याभावप्रमासामान्य इत्यर्थः। तेन वृक्षत्वस
मानाधिकरणस्य संयोगसामान्याभावस्यैव गुणे धर्मिणि प्रमायाः साध्यवत्ताज्ञानविरोधित्वेऽपि संयोगी एतद्

क्षणादित्यादौ नाव्याप्तिः। यत्तु साध्यवत्ताज्ञानविरोधित्वं हेतुमन्मात्रवृत्तिधर्मावच्छिन्नविशेष्यताकं यत्साध्यवत्ताज्ञानं तद्वि
रोधित्वरूपं वाच्यं। तथा च गुणो न संयोगीति प्रमायाः गुणसंयोगीत्याकारकबुद्धिविरोधित्वेपि तादृशसाध्य
वत्वधीर्न हेतुमन्मात्रवृत्तिधर्मावच्छिन्नविशेष्यका गुणत्वादेर्हेतुमदन्यवृत्तित्वादतो नोक्तदोष इति तत्तु
च्छं। पक्षसमानाधिकरणेत्यस्य वैयर्थ्यापत्तेः। साध्याभावप्रमासामान्ये यद्धेतुमन्मात्रवृत्तिधर्मावच्छिन्नविशेष्यक
साध्यवत्ताज्ञानविरोधित्वं नास्ति तत्त्वमित्यस्यैव सम्यक्त्वात् जलादिधर्मिकवन्हिसामान्याभावप्रमायाः साध्य
वत्ताज्ञानविरोधित्वेपि धूमवन्मात्रवृत्तिधर्मावच्छिन्नविशेष्यकं यद्वन्हिमत्ताज्ञानं तदविरोधित्वादेव वन्हिमान्धू
मादित्यादावव्याप्तिसंभवादिति दिक्। अत्र साध्यतावच्छेदकेन संबंधेन रूपेण च साध्यवत्ताज्ञानं बोध्यं तेन पर्वतः स
मवायेन वन्हिमानित्याकारकप्रमायाः समवायेन वन्हिमत्ताबुद्धिं प्रति पर्वतः संयोगेन महानसीयवन्हिमानित्या

रिप्रमायाश्च संयोगेन महानसीयवह्निमत्ताबुद्धिं प्रति च प्रतिबंधकत्वेपि न वह्निमान् धूमादित्यादावव्याप्तिः। प्रतिबंधकत्वं
मात्रावच्छेदकधर्मवत्ताज्ञानव्यावर्त्तं ग्राह्यं। तेन वह्निसामान्याभावावच्छेदकतयाग्रहीतस्य महानसीयवह्न्यभावादेः पर्व
तादौ प्रमायाः संयोगसंबंधावच्छिन्नपर्वतधर्मिकवह्निमत्ताबुद्धिविरोधित्वेपि नासंभवः। सर्वत्रेति। साध्यसामानाधिकरण्या
वच्छेदकस्य समानाधिकरणत्वकत्वमिति तत एव प्रथमस्य द्वितीयस्य च यत्समानाधिकरणप्रमासामान्ये साध्यवत्ताज्ञान
विरोधित्वं नास्ति तत्त्वमिति तत एव सामंजस्यादिति भावः। यत्तु यत्समानाधिकरणसाध्याभाववत्त्वावच्छेदेन साध्यतावच्छेदका
वच्छिन्नप्रतियोगिसामानाधिकरण्यं तत्त्वमेव प्रथमलक्षणार्थः। तथा च धूमसमानाधिकरणस्य घटादिसामान्याभा
वस्य वह्नित्वाद्यवच्छिन्नघटाद्यप्रसिध्या साध्यतावच्छेदकावच्छिन्नप्रतियोगिसामानाधिकरण्याभावादसंभवस्यादतः सा
ध्याभावपदं। चैनेवमपि प्रतियोगिपदं व्यर्थमिति वाच्यं। अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वे साध्यतावच्छेदकावच्छिन्न

प्रतियोगिसामानाधिकरण्याभावस्याखंडस्येव निविष्टत्वात्। एवं द्वितीयलक्षणेपि साध्यतावच्छेदकावच्छिन्नप्रतियोगिमत्वग्
हविरोधित्वं निवेश्य साध्याभावपदं सार्थकं बोध्यमितीति। तन्मंदं। प्रतियोग्यवृत्तित्वेति ग्रंथावतारानुरोधेन साध्याभावस्य सर्वो
क्तद्वितीयरीत्यैव वक्तव्यतया हेतुसमानाधिकरणस्य वन्हित्वेन घटाभावस्य साध्यतावच्छेदकावच्छिन्नप्रतियोगिसामानाधि
करण्याप्रसिध्या तादृशपदं प्रक्षिप्याप्यसंभवतादवस्थ्यात्। न च घटत्वेन वन्ह्यभाव एव वन्हित्वेन घटाभावात्मकः स
मनियताभावानामैक्यात्। तथा च स्वोक्तेपि साध्यतावच्छेदकविशिष्टवन्हिस्वरूपप्रतियोगिनः सामानाधिकरण्यमक्ष
तमेवेति वाच्यं। तथा च घटसामान्याभावादेरपि घटत्वादिना प्रमेयसामान्याभावात्मकतया तस्यापि साध्यतावच्छेदकीभूत
वन्हित्वावच्छिन्नप्रमेयरूपप्रतियोगिसमानाधिकरणतया तमादायासंभववारकस्य साध्याभावपदस्य व्यर्थतापत्तावप्र
लेपापत्तित्वादिति॥ ॥ ॥ ॥ ॥श्रीगुरुभ्यो नमः॥ ॥

प्रगल्भस्यैव लक्षणांतरमुपन्यस्यति। यन्निष्ठेति। यद्वृत्ताविति। यन्निष्ठसाध्याभाववद्वृत्तित्वसामान्यमित्यर्थः। तेन वह्निनिष्ठस्य व्यधिकरणधर्मावच्छि
न्नधूमाभाववद्वृत्तित्वस्य धूमसाध्यकानुमित्यविरोधित्वेपि धूमवान्वह्नेरित्यादौ नातिव्याप्तिः। धूमादिनिष्ठेंधनत्वाद्यवच्छिन्नवन्ह्यभाववद्वृ
त्तित्वस्यापींधनत्वादिप्रकारेण वन्ह्यनुमितौ विरोधित्वादसंभवः स्यादतः प्रकृतेति। साध्यतावच्छेदकसंबंधेन रूपेण च प्रकृतसाध्यकेत्य
र्थः। तथा च तादृशसाध्याभाववद्वृत्तित्वस्य वह्नित्वेन वन्ह्यनुमितिं प्रत्यविरोधित्वाददोषः। प्रकृतानुमितिविरोधित्वं न प्रकृतानुमितिवि
रोधिज्ञानविषयत्वमात्रं धूमनिष्ठवृत्तित्वस्यापि वन्ह्यनुमितिविरोधिनो भ्रमात्मकव्यभिचारिज्ञानस्य विषयत्वसंभवात् किं तु विषयत
या प्रकृतानुमितिप्रतिबंधकतावच्छेदकत्वं। तथा च वह्निनिष्ठवृत्तित्वमात्रस्य धूमसाध्यकानुमितिविरोधितावच्छेदकत्वाभावात् व्यभिचा
रिण्यतिव्याप्तिरतः साध्याभाववतीति। तथा च यन्निष्ठसाध्याभाववद्वृत्तित्वसामान्यं प्रकृतानुमितिप्रतिबंधकतावच्छेदकं तत्त्वमर्थः। न च
घटाभाववद्वृत्तित्वादौ साध्याभाववद्वृत्तितात्वभ्रमदशायामपि धूमसाध्यकानुमित्यनुत्पत्त्या वह्निनिष्ठस्य निर्धूमवृत्तित्वस्य धूमसाध्य
नुमितिप्रतिबंधकतानवच्छेदकत्वाद्व्यभिचारिण्यतिव्याप्तितादवस्थ्यमिति वाच्यं। यन्निष्ठसाध्याभाववद्वृत्तित्वसामान्यं × विषयित

सामान्यं न प्रकृतानुमितिप्रतिबंधकज्ञानातिरिक्तवृत्तेरनुमित्यस्योक्तत्वात्। साध्याभावस्तु पूर्वोक्तद्वितीयशरीरस्य निवेशनीयः। तेन न पूर्वोक्तदोषः। अनु
मित्यविरोधित्वज्ञानस्येति। अनुमितिविरोधित्वं हि न साक्षादनुमितिप्रतिबंधकत्वं व्यभिचाराद्यधियः साक्षादतथात्वेन व्यभिचारिण्यतिव्याप्त्यभि
प्रसंगापत्तेः। किं त्वनुमितिजनकज्ञानविरोधित्वं तज्जनकं च यदि निरुक्तव्याप्तिज्ञानं तदा तादृशज्ञानं प्रति न साध्याभाववद्वृत्तित्वज्ञानं विरोधि
किं तु साध्याभाववद्वृत्तित्वं अनुमितिविरोधीत्याकारकं ज्ञानमेवेति व्यभिचारिण्यतिव्याप्तिः। यदि च साध्याभाववदवृत्तिर्हेतुरित्याकारकज्ञा
नं प्रकृतानुमितिजनकं तदा निरुक्तव्याप्तेरनुमित्यनुपयुक्ततया तदभिमानमर्थान्तरग्रस्तमिति भावः। एतेन यदि प्रकृतानुमितिपदं प्रकृतहे
तुधर्मिकसाध्याभाववदवृत्तित्वानुमितिपरं न तु प्रकृतसाध्यकानुमितिपरं। विरोधित्वं चात्र साक्षादेव निवेश्यते तदा न व्यभिचारिण्यतिप्र
संगः इत्यपास्तं। तादृशव्याप्तेरनुमित्यनुपयुक्ततया तदभिधानेऽर्थान्तरतादवस्थ्यादिति॥ ५२ ॥श्रीसांब॥ ५२ ॥त्रिकाललक्षणमेव
परिष्कृत्योपन्यस्यति। केचित्त्विति। केवलान्वयिनि प्रसिद्ध्यावपि व्यावृत्त्यादि साध्यकव्यतिरेकेण यावन्तः साध्याभावाः तत्तज्जातीयत्वं तद्वृ
त्त्यन्तररूपात्मकमप्रसिद्ध्यत उक्तं प्रत्येकमिति। यावन्तः साध्याभावास्तेषां मध्ये एकमपि न जातीयत्वमेकस्मिन्नभावे नास्तीत्यत उक्तं

तत्तत्सजातीय इति। तदधिकरणवृत्तित्वाभावा इत्यन्तेन तत्पदेन यावत्साध्याभावपरामर्शे वह्निमान्धूमाद्धूमसामान्याभाववान्वायुत्वादित्यादौ साध्या
भावात्मकतत्तद्विपक्षावृत्तित्वावच्छिन्नाभाववद्यावद्धूपाधिकरणाप्रसिध्या अव्याप्तिरतस्तदधिकरणेति। तथा च प्रातिस्विकरूपेण साध्याभावानु
पादायतत्तत्सजातीयस्तत्तदधिकरणवृत्तित्वाभावो ग्राह्य इति भावः। व्यधिकरणधर्मावच्छिन्नसाध्याभावसजातीयं घटत्वादिना तत्तदधिक
रणवृत्तित्वाभावमादाय व्यभिचारिण्यतिव्याप्तेर्वारणाय यावन्त इति। तथा च साध्यसामान्याभावसजातीयस्य तत्तदधिकरणवृत्तित्वा
भावस्य तत्रासत्त्वान्न दोषः साध्यसामान्याभाववद्वृत्तित्वस्यैव व्यधिकरणधर्मावच्छिन्नाभावो व्यभिचारिण्यस्तीत्यतः सजातीय इत्युक्तं।
ननु घटत्वादिना निर्धूमवृत्तित्वस्याभावोऽप्यभावत्वादिना धूमसामान्याभावसजातीय एवेत्यतिव्याप्तितादवस्थ्यमत आह। साजात्यं
चेति। यद्यपि साध्याभावनिष्ठं यत्समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वान्यतर
रूपं तेनैव रूपेण साजात्यं वाच्यं। तथा च वह्निसामान्याभावादिनिष्ठं यत्तादृशान्यतररूपं वह्नित्वावच्छिन्नप्रतियोगिताकत्वादिस्वरू
पं तस्य निर्वह्निवृत्तित्वसामान्याभावादावसत्त्वादसंभवः। तथापि यावन्तः समानाधिकरणधर्मावच्छिन्नाभावास्तावदन्यतमत्वतद्भि
न्नत्वान्यतररूपेण साजात्यं वाच्यमित्यदोषः। समनियताभावानामैक्याद्गगनाभाव एवेति। अखिलव्यधिकरणधर्मावच्छिन्ना

भावइति मतेतु गगनाभावत्वगगनाभावभिन्नत्वान्यतररूपेणैव साजात्यं वाच्यं। तेन घटत्वेन निर्धूमवृत्तित्वाभावस्यैव गगनत्वादिसमानाभि
करणधर्मावच्छिन्नप्रतियोगिताकतया धूमसामान्याभावसजातीयत्वेपि नातिव्याप्तिः। साध्याभाववद्वृत्ति। साध्यतावच्छेदकावच्छिन्नव्यापकताव
च्छेदकरूपावच्छिन्नप्रतियोगिताकाभावोत्र साध्याभावपदेनोक्त इत्यर्थः। साध्यव्यापकतावच्छेदकप्रतियोगिताकत्वरूपप्रथमरीत्याभि
धाने घटत्वविशिष्टवाच्यत्वाद्यभावस्यापि साध्याभावपदार्थतया तत्सजातीयस्य तदधिकरणवृत्तित्वाभावस्यापि हेतावसत्वादसंभ
वः स्यादतः स्तत्परित्यागः। अत्र साध्याव्यापकताघटकसंबंधेनैव साध्यव्यापकस्याभावो ग्राह्यः। तेनैकसंबंधेन व्यापक
स्य संबंधांतरावच्छिन्नाभाववति हेतौ वृत्तावपि न क्षतिः। यत्तु साध्यतावच्छेदकसंबंधेन व्यापकत्वं तेनैव संबंधेन साध्याभा
वो निवेशनीय इति मतं तत्तुच्छं। यत्र तादात्म्यसंबंधेन प्रमेयमात्रं साध्यं तत्र तेन संबंधेन साध्यव्यापकतावच्छेदकं यत्प्रमे
यत्वादिकं तादात्म्येन तदवच्छिन्नाभावाप्रसिध्या तत्र सद्धेतावव्याप्तेः प्रमेयत्वेन पटपटोभयभेदस्वीकारेण कथंचित्तद्गौव्या
प्तेर्वारणेपि च। त्वनियामिकसंबंधेन साध्यतायामव्याप्तिः साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगित्वाप्रसिद्धेः। किंचैवं
धूमवान्वह्नेरित्यादावतिव्याप्तिः। संयोगेन धूमसामान्याभावस्याव्याप्यवृत्तितया धूमत्वे घटाभावस्यैव तादृशस्यैव यावदंत

गतत्वेन तत्सजातीयस्य तदधिकरणवृत्तित्वाभावस्यैव वह्नौ सत्त्वात्। अस्माकं तु स्वरूपसंबंधेनाभःपिंडभेदस्यापि धूमव्यापकतया वह्नेस्त
दभाववद्वृत्तित्वादिति व्याप्तिनिरासादिति ध्येयं। ननु कपिसंयोग्येतत्त्वादित्यादावव्याप्तिः कपिसंयोगसामान्याभावस्यापि प्रतियोगि
वैय्यधिकरण्यघटितसाध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वेन यावदंतर्गतत्वात्तत्सजातीयस्य तदधिकरण
वृत्तित्वाभावस्य हेतावसत्त्वादत आह। व्याप्यवृत्तिश्चेति। व्याप्यवृत्तित्वं --- निरवच्छिन्नवृत्तिकात्यत्वं। संयोगी सत्त्वादित्यादौ तु
द्रव्यत्वादिसामान्याभावस्यापि साध्याभाववत्तया हेतौ सत्त्वादधिकरणवृत्तित्वादेरनातिव्याप्तिः। ननु रूपवान् पृथिवीत्वादित्यादावव्या
प्तिः। रूपत्वेन नित्यसमवेताभावस्यापि निरुक्तयावत्साध्याभावांतर्गतत्वात्तत्सजातीयस्य तदधिकरणवृत्तित्वस्य हेतावसत्त्वात्। तु सा
मान्यधर्मेण विशेषाभावस्वीकारे तु रूपत्वेन तद्रूपाभावमादाय व्याप्तिः। तत आह। प्रतियोगितावच्छेदकेत्यादि। प्रतियोगिताव
च्छेदकावच्छिन्नप्रतियोगिव्यधिकरणत्वं च यत्प्रतियोगिताकाभावे स्वावच्छेदकसंबंधेन स्वसमानाधिकरणस्वावच्छेदका
वच्छिन्नसामानाधिकरण्यं तदन्यप्रतियोगिताकत्वं तेन नित्यरूपात्मकेन प्रतियोगितावच्छेदकावच्छिन्नेन प्रतियोगि
सामानाधिकरण्यविरहेपि उक्ताभावस्य न संग्रहः। न वा वाच्यत्वत्वेन प्रमेयत्वसाध्याभावस्यैव ज्ञेयत्वत्वेन वाच्यत्वसाध्यभा

वत्तयाधिकरणधर्मावच्छिन्नाभावस्यैव × मात्रप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिसामानाधिकरण्येपि तदसंग्रहः। निरु
क्तायां तदन्यप्रतियोगितायामेव साध्यव्यापकतावच्छेदकरूपावच्छिन्नत्वं बोध्यं। तेन कपिसंयोगस्वरूपाभावे समवेतसा
मान्याभावनिष्ठनिरूपकप्रतियोगिताकत्वे कपिसंयोगाभावत्वरूपसाध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वयोः
सत्वेपि कपिसंयोगाभाववान् वाच्यत्वादित्यादौ एतद्रूपत्वेन निरुक्तसमवेताभावस्यैव नित्यरूपसामान्याभावरूपतया तत्र नित्यत्व
पर्याप्तावच्छिन्ननिरूपकप्रतियोगिताकत्वे साध्यव्यापकतावच्छेदकीभूतरूपत्वावच्छिन्नप्रतियोगिताकत्वयोः सत्वेपि रूपवान् पृथिवी
त्वादित्यादौ च नाव्याप्तिः समवेतसामान्याभावत्वावच्छिन्नप्रतियोगितायाः साध्यव्यापकतावच्छेदकरूपानवच्छिन्नत्वादिति ध्येयं। द्वितीयपरी
तेः प्रवेशस्य फलमाह। तत्तत्साध्यव्यक्तेरिति। अभाववति वृत्तावपि हेतोर्नाव्याप्तिरिति परेणान्वयः। व्याप्यवृत्तित्वादेः फलमाह
। अव्याप्यवृत्तेर्वा साध्यस्येति तत्तत्साध्याभावेत्यादि। सामान्यतः साध्याभाववद्वृत्तित्वस्य व्यापके समवेतो वह्निसामान्याभा
वस्सजातीयस्य अधिकरणधर्मावच्छिन्नाभावसाधारणसाध्याभाववद्वृत्तित्वव्यापकप्रतियोगिताकाभावस्याप्रसि
द्ध्या अतिरेकिमात्रे अव्याप्तिरत उक्तमिति साध्याभावविशेषणं। तथा च निर्वह्निवृत्तित्वसामान्याभाव एव निर्वह्निवृ ३९

नित्यत्वव्यापकप्रतियोगिताकः तत्तत्साध्याभावसजातीयोऽस्तीत्यदोषः। नन्वेवमपि जलवृत्तित्वेन निर्धूमवृत्तित्वाभावस्य निरुक्तरूप
शालिनो वह्नौ सत्त्वादतिव्याप्तिः। न च व्यासज्यवृत्तिधर्मानवच्छिन्नत्वं परित्यज्य स्वन्यूनवृत्तिधर्मानवच्छिन्नत्वमेव प्रतियोगितायां
विशेषणं वाच्यमतो नोक्तदोष इति वाच्यं। तथापि गुणभेदाभावसजातीयस्य पूर्वक्षणवृत्तित्वविशिष्टगुणसमवेतत्वाभावस्य
हेतौ सत्त्वाद्गुणभिन्नं सत्त्वादित्यादावतिप्रसंगादत आहा तत्तत्साध्याभाववद्वृत्तित्वव्यतिरिक्तसमानाधिकरणधर्मानवच्छिन्न
प्रतियोगिताकोऽभावो बोध्य इति। अयं पाठः क्वाचित्कः। तत्र व्यतिरिक्तान्तेन न निर्वह्निवृत्तित्वसामान्याभावादेः संग्रहः। अन्यथा वह्निसा
मान्याभावसजातीयस्य समानाधिकरणधर्मानवच्छिन्नप्रतियोगिताकाभावस्याप्रसिद्ध्याऽव्याप्तिप्रसंगात्। न च निर्धूमत्वादिसजा
तीयस्य निर्धूमवृत्तित्वत्वादिनावच्छेद्यस्येतरभावस्य हेतौ सत्त्वाद्धूमवान्वह्नेरित्यादावतिव्याप्तिः। हेतुतावच्छेदकसंबंधावच्छिन्नवृत्ति
तामात्रनिष्ठत्वेन प्रतियोगितायाविशेषणीयत्वेऽपि निर्धूमवृत्तित्वत्वेन जलवृत्तित्वजलान्यनिर्धूमवृत्तित्वोभयाभावमादायाति
व्याप्तितादवस्थ्यमिति वाच्यं। एतदस्वरसेनैव यद्वेत्यादिलक्षणान्तरस्य वक्ष्यमाणत्वात्। यद्यपि तत्तत्साध्याभाववद्वृत्ति
त्वेनावच्छिन्नाभावा इत्यस्यैव सम्यक्त्वे समानाधिकरणधर्मादिकं प्रक्षिप्य निषेधद्वयस्य निवेशो व्यर्थः

सर्वत्र व्याधिकरधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वं चेन्न घटाद्यभावस्यैव तादृशस्य साध्याभावसजातीयस्य संभवात्।
तथापि यथासंनिवेशो न वैयर्थ्यं यत्र तादात्म्ये न हेतुता तत्र सद्धेतौ व्यधिकरणधर्मावच्छिन्नसाध्याभाववत्तादा
त्म्यस्य अगत्या स्वरूपतया तादृशतादात्म्यत्वस्य केवलान्वयित्वेन तदवच्छिन्नाभावाप्रसिध्या अव्याप्तिरतो वा लक्ष
णद्वयगर्भे ~~तावैयर्थ्यम~~। यत्तु तत्तत्साध्याभाववद्वृत्तित्वत्वावच्छिन्नाभावाद्युक्त्याभावसंभवस्यात् व्यधिकरण
धर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वावच्छिन्नाभावाप्रसिद्धेस्तादृशवृत्तित्वत्वमपेक्ष्य लघोर्वृत्तित्वत्वमात्रस्यै
वोक्ताभावप्रतियोगितावच्छेदकत्वादिति। तन्नुच्छं गुरोः प्रतियोगितावच्छेदकत्वमंगीकृत्यैतल्लक्षणकरणात् अ
न्यथा महाकालभेदे साध्ये जन्यत्वविशिष्टघटादेः कालिकसंबंधेन हेतुतायामव्याप्तिप्रसंगात्। महाकालभेदाभाव
वद्वृत्तित्वत्वमपेक्ष्य लघुना वृत्तित्वत्वमात्रेणैव महाकालभेदाभाववद्वृत्तित्वाभावप्रतियोगिताया अवच्छेदात्। महा
कालभेदाभावसजातीयस्य तद्वद्वृत्तित्वत्वातिरिक्तसमानाधिकरधर्मानवच्छिन्नप्रतियोगिताकाभावस्याप्रसिद्धेरि

तिध्येयं।तादृशावृत्तित्वव्यापकेत्यस्य प्रयोजनमाह। साध्याभाववद्वृत्तिविशिष्टवृत्तित्वस्येति। अभावमादायनातिप्रसंगइ
त्यन्वयः। ननुव्यभिचारनिरूपकाधिकरणस्य घटान्यत्वाभावस्यापि साध्याभाववत्तया तद्वृत्तित्वसामान्याभावस्य व्यभिचारि
ण्यसत्वात् कृतातिव्याप्तिरत आह। पार्थिवत्वादीति। पार्थिवत्वादिविशिष्टं यन्निर्धूमवृत्तित्वं तद्वन्हौ नास्ति वन्हेरपार्थिवत्वादित्यति
प्रसंग इति भावः आदिना जलत्वादिसंग्रहः। व्यासज्यवृत्तिधर्मानवच्छिन्नेत्यस्य प्रयोजनमाह। द्वित्वाद्यवच्छिन्नस्यवे
ति। निर्धूमवृत्तित्ववह्निभेदोभयत्वावच्छिन्नस्य वेत्यर्थः। न दोष इति। अन्यथा निर्वह्निसंयुक्तत्वाभावस्य साध्याभावव
द्वृत्तित्वव्यापकजातियोगिताकत्वाभावान्निर्वह्निवृत्तित्वसामान्याभावस्य धूमे असत्वाद व्याप्तिरेव स्यादि
ति भावः। इष्टं चेति। साध्याभाववद्वृत्तित्वस्य हेतुतावच्छेदकसंबंधेनउक्तौ चेत्यर्थः। तादृशसंबंधेन हेत्वधिकर
णताप्रवेशो गौरवमतः क्वचिदित्युक्तं। तथा च हेतुतावच्छेदकसंबंधावच्छिन्नाधिकरणतावद्वृत्तित्वं सा
ध्याभावविशेषणमित्यर्थः। सत्वादावित्यादिपदेन वह्निमान्धूमादित्यादिपरिग्रहः। तत्रापि जातिसामा

न्याभावोदः साध्याभाववत्तया तद्वृत्तिसंयोगेन वृत्त्यप्रसिद्धेरव्याप्तिसंभवात्। ननु द्रव्यं विशिष्टसत्त्वादित्यत्राव्याप्तिः वि
शिष्टसत्त्वस्य सत्तानतिरेकेण द्रव्यत्वाभाववति वृत्त्या द्रव्यत्वाभावसजातीयस्य तद्वृत्तित्वाभावस्य हेतावस
त्त्वात्। न चैवं विशिष्टहेत्वधिकरणे वर्त्तमान एव साध्याभावो गृह्यतां तावतैवोक्तदोषव्युदासादिति वाच्यं। तथा
पि धूमवान्वह्नेरित्यत्रातिव्याप्तेः। निर्धूमवृत्तित्वसामान्याभावस्य महानसीयवह्नौ सत्त्वात्। न च हेतुतावच्छेद
कधर्मावच्छेदेन तादृशवृत्तित्वाभाववत्त्वं विवक्षितं। तथा सत्यपि निर्धूमत्वादिसजातीयं निर्धूमवृत्तित्वं येन
वेन्यवृत्तेरभावं तादृप्येण जलवृत्तित्वजलान्यनिर्धूमवृत्तित्वोभयाभावं चादायातिव्याप्तितादवस्थ्यमत आ
ह। यद्वेति। वह्नित्वाद्यवच्छिन्नधूमाभावसजातीयस्य तद्व्यापकीभूतस्य तस्यैवाभावस्य प्रतियोगितावच्छेदकेन
वह्नित्वादिना वह्नित्वाद्यवच्छिन्नं प्रति व्यापकतावच्छेदकाव्यभिचारिण्यतिव्याप्तिरतो यावंत इति। तथा च धूमा
दिसामान्याभावस्यापि साध्याभाववत्तयाभिमतदंतर्गतत्वात्तद्व्यापकीभूताभावप्रतियोगितावच्छेदकेन धूम ४१

त्वादिना वह्न्यादिकं प्रति व्यापकत्वाभावान्नातिव्याप्तिः तत्तद्वह्न्यभावसजातीयस्य तद्व्यापकीभूताभावस्य प्रतियो-
गितावच्छेदकेन तत्तद्वह्नित्वादिना धूमादिकं प्रति व्यापकत्वाभावादसंभव इत्यतस्तादृशास्साध्याभावा इति साध्यता-
वच्छेदकावच्छिन्न व्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावा इति तदर्थः तत्तद्वह्नित्वादिकं तु न साध्यव्यापक-
तावच्छेदकमतस्तदवच्छिन्नाभावमादाय नोक्तदोषः तादृशसाध्याभावसाजात्यं तादृशयावत्साध्याभाववृत्ति प्रागुक्ता-
न्यतररूपवत्त्वं तच्च व्यतिरेकिण्यप्रसिद्धमतः प्रत्येकमिति। यद्यपि तादृशयावत्साध्याभावानां प्रत्येकनिरूपितसाजात्यं
न कुत्राप्यवेस्तीति व्यतिरेकिण्यव्याप्तितादवस्थ्यं। तथापि तेषामित्यत्र तस्य तस्य तस्येत्येकशेषकरणाद्यावन्तः साध्या-
भावाः प्रत्येकं तत्तत्सजातीयस्य तद्व्यापकीभूताभावस्य लाभाददोषः। धूमादिसामान्याभावव्यापकस्य वह्नित्वादिना घ-
टाद्यभावस्य प्रतियोगितावच्छेदकेन वह्नित्वादिना वह्नित्वाद्यवच्छिन्नं प्रति व्यापकत्वाद्व्यभिचारिण्यतिव्याप्तिरतः
सजातीयस्येति। साजात्यं तु प्रागुक्तदिशा ग्राह्यं। तेन संयोगादिसंबंधावच्छिन्नद्रव्यत्वादिनिष्ठावच्छेदकतैकव

ग्यभावप्रतियोगितावच्छेदकेन द्रव्यत्वादिना वह्न्यादिव्यापकत्वेऽपि धूमवान्वह्नेरित्यादौ नातिव्याप्तिः। तादृशाभाव
स्य [illegible] धूमादिसामान्याभावसजातीयत्वविरहादिति ध्येयं। धूमादिसामादिसामान्याभावसजातीयस्य तद्व्या
पकीभूतस्य चैव वह्निसंयोगाद्यभावस्य प्रतियोगितावच्छेदकेन वह्निसंयोगत्वादिना वह्न्यादिकं प्रति व्यापक
त्वादतिव्याप्तिरतो व्याप्यवृत्तिरिति। वस्तुतो वह्नित्वेन धूमवद्भेदाभावस्य प्रतियोगितावच्छेदकेन वह्नित्वेन व
ह्निं प्रति व्यापकत्वादतिव्याप्तिरतो व्याप्यवृत्तितानिरूपकप्रतियोगिताकाभावव्याप्यवृत्तिपदं। तेन धर्मप्रति
योगिताकाभावे स्वावच्छेदकावच्छिन्नसामानाधिकरण्यव्यधिकरणधर्मावच्छिन्नाभावभिन्नत्वोभयाभा
वस्तादृशप्रतियोगिताया एवं लक्षणघटकत्वान्नोक्तदोषः धूमाभावसजातीयस्य वह्न्याद्यभावस्य प्रति
योगितावच्छेदकेन वह्नित्वादिना वह्न्यादिकं प्रति व्यापकत्वाद्धूमवान्वह्नेरित्यादावतिव्याप्तिरतो व्यापकीभू
तस्येति। यद्यपि तत्र व्यभिचारस्थलीयत्वाभावस्यापि निरुक्तसाध्याभावतया तत्समानाधिकरणस्य त

ॐ स्वजातीयाभावस्यप्रतियोगितावच्छेदकेनधर्मेणतद्योगोच्छेदकभेदत्वादिनावह्नित्वाद्यवच्छिन्नंप्रतिव्यापकत्वाभावात्सा
मानाधिकरण्यमात्रोक्तावपिनातिव्याप्तिः। तथापिसाध्याभावव्यापकत्वघटितनिरुक्तसाध्याभावस्वजातीयाभावेसा
ध्याभावसामानाधिकरण्यस्याप्रविष्टतयानसाध्याभावव्यापकीभूतपर्यन्तस्यव्यर्थतेतिध्येयं। यत्तुसाध्यतावच्छेदक
संबंधेनसाध्यव्यापकतायाःयदवच्छेदकंतेनैवसंबंधेनतत्तद्रूपावच्छिन्नाभावोऽत्रसाध्याभावशब्दार्थः। तथाचसंयोगो
च्छेदकभेदत्वस्यनसंयोगात्मकसाध्यतावच्छेदकसंबंधेनधूमव्यापकतावच्छेदकत्वमितितदवच्छिन्नाभावोनसा
ध्याभावः। किंतुस्वसाध्याभावएवतत्समानाधिकरणस्यवह्न्याद्यभावस्यप्रतियोगितावच्छेदकेनवह्नित्वादिनावह्नित्वाद्यवच्छिन्नंप्र
तिव्यापकत्वादतिव्याप्तिरतःसमानाधिकरणस्येत्यपहायव्यापकीभूतस्येत्युक्तं। नचैवंवह्निमान्धूमादित्यत्राव्याप्तिः
संयोगेनवह्न्यभावस्यापिसाध्याभावतयातस्यकेवलान्वयित्वेनतत्सजातीयव्यापकीभूतव्याप्यवृत्त्यभावाप्रसि
द्धेरितिवाच्यं। यावन्तोव्याप्यवृत्तयःसाध्याभावास्तेषामेवनिवेश्यतयावह्निसामान्याभावस्यनिरवच्छिन्नेहत्वाधिकर

पाधनिकत्वरूपव्याप्यवृत्तित्वविरहेण यावदनंतर्गतत्वात् धूमाभावस्तु वन्हिमदयोगोलक एव तादृशव्याप्यवृत्तिरिति तत्र
तादात्म्येन प्रमेयमात्रस्य साध्यतायामव्याप्तेः। तत्र प्रमेयत्वादेरेव तादात्म्येन साध्यव्यापकतावच्छेदकतया तादात्म्येन तदवच्छि
न्नाभावाप्रसिद्धेः। अन्ये तु यावंतः साध्याभावाः प्रत्येकं तत्तत्सजातीयनिष्ठयद्रूपावच्छिन्नप्रतियोगिताकाभावत्वं तत्तत्सा
ध्याभावव्यापकतावच्छेदकं तत्तद्रूपेण यद्रूपावच्छिन्नं प्रति व्यापकत्वमवच्छिद्यते तद्रूपवत्त्वमर्थः। तत्र च साध्याभावव्यापक
तावच्छेदकत्वमपहाय साध्याभावे समानाधिकरणवृत्तित्वोक्तौ गुणान्यत्वविशिष्टसत्ताभाववान् द्रव्यान्यत्वविशिष्ट
सत्ताभावादित्यत्राव्याप्तिः। गुणान्यत्वविशिष्टसत्ताभावाभावरूपस्य द्रव्याद्यन्यतमाद्यभावरूपस्य निरुक्तसाध्या
भावस्य सजातीये समानाधिकरणे च सत्ताभावे वर्त्तते यद् द्रव्यान्यत्वविशिष्टसत्ताभावत्वरूपधर्मावच्छिन्नप्रति
योगिताकाभावत्वं तेन द्रव्यान्यत्वविशिष्टसत्ताभावत्वरूपधर्मेण हेतुतावच्छेदकावच्छिन्नं प्रति व्यापकतावच्छेदात्
साध्याभावव्यापकतावच्छेदकत्वोक्तौ तु द्रव्यान्यत्वविशिष्टसत्ताभावत्वावच्छिन्नप्रतियोगिताकत्वादिकं न गुणान्य ६२

त्वविशिष्टसत्ताभावाभावाद्यात्मकस्य साध्याभावस्य व्यापकतावच्छेदकं द्रव्य एव व्यभिचारादतो नोक्तदोष इत्याहुः। द्रव्यंविशिष्टसत्वा
दित्यादौ व्यापकीभूततादृशाभावप्रतियोगितावच्छेदकेन गुणत्वादिना सत्वादिकं प्रति व्यापकत्वानवच्छेदाद व्याप्तेराह यद्रू
पावच्छिन्नं गतीति। ५ न चेदं गमनं स्पन्दत्वादित्यादौ तादृशस्य गतित्वाद्यभावस्य प्रतियोगितावच्छेदकीभूतेन गतित्वत्वादिनापि
(संबंधः) कालिकसंबंधेन स्पन्दत्वव्यापकत्वादतिव्याप्तिरिति वाच्यं। तादृशाभावस्य यत्प्रतियोगितायाअवच्छेदको धर्मस्तत्प्रतियोगिता
वच्छेदकसंबंधेन हेतुव्यापकत्वस्योक्तत्वादिति भावः। परैः परिष्कृतं निरसितुमाह साधनस्येत्यादिना तादृशेति। यावन्तः सा
ध्याभावाः प्रत्येकं तत्तत्सजातीयव्यापकीभूताभावेत्यर्थः। तदवच्छेदकत्वमिति। तत्तत्साध्याभावसजातीयतत्व्यापकीभूताभावप्रति
योगितावच्छेदकत्वमित्यर्थः। ६ प्रथमे ७ दूषणमाह द्रव्यमित्यादि। तादृशाभावेति साध्याभावसजातीयव्यापकीभूताभावेत्य
र्थः। द्वितीये दूषणमाह तेयं प्रमेयादित्यादि। प्रमेयत्वादेरिति। न च सामान्यधर्मेण विशेषाभावस्य व्यवस्थापितत्वात् प्रमेयत्वे
न गगनाभावस्यैव प्रागुक्तक्रमेण साध्याभावसजातीयस्य प्रतियोगितावच्छेदकं प्रमेयत्वमादाय नाव्याप्तिरिति वाच्यं। त
थापि विषयत्वापेक्षया गौरवात् प्रमेयत्वलक्षणविषयत्वस्य प्रतियोगितानवच्छेदकत्वे नोक्ताव्याप्तिनादवस्थ्यादिति भा

वः । नव्यास्तु यावन्तः साध्याभावाः प्रत्येकं तत्तत्सजातीयाय तत्तत्समानाधिकरणाव्याप्यवृत्त्यभावस्तत्प्रतियोगित्वमेव व्याप्तिः
व्याप्यवृत्तित्वं तु प्रकृतहेतुसामानाधिकरण्यव्यधिकरणधर्मावच्छिन्नाभावभिन्नत्वोभयाभाववत्त्वं । तेन धूमसामा
न्याभावसमानाधिकरणस्य तत्तत्सजातीयस्य वह्निधूमोभयत्वावच्छिन्नाभावस्य प्रतियोगित्वेपि धूमसाध्य
कवह्नौ नातिव्याप्तिः । तादृशोभयाभावस्य निरुक्तव्याप्यवृत्तित्वाभावात् । एवं च यत्राभावे प्रकृतसाध्यसामानाधि
करण्यव्यधिकरणधर्मावच्छिन्नाभावभिन्नत्वोभयाभावः स एव साध्याभावपदार्थः । तेनाभाववान् प्रमेयत्वा
दित्यादौ साध्यप्रतियोगिकघटादिवृत्तित्वाद्यवच्छिन्नाभावस्याधिकरणे घटादौ वर्त्तमानस्य तत्तत्सजातीयस्य हेत्वभावस्य नि
रुक्तव्याप्यवृत्तित्वाप्रसिद्धावपि नाव्याप्तिः । इत्थं च द्रव्यं सत्त्वादित्यादौ गुणान्यत्वाद्यभावस्यापि निरुक्तसाध्याभाववत्त्वात्त
दधिकरणे गुणादौ वर्त्तमानस्य तत्तत्सजातीयाभावस्य निरुक्तव्याप्यवृत्तित्वाप्रसिद्ध्यैव नातिव्याप्तिः । वाच्यं प्रमे
यादित्यादौ तु व्यधिकरणधर्मावच्छिन्नत्वाभावाद्यभावसमानाधिकरणस्य विरुद्धघटत्वपटत्वाभ्यां प्रमेया

भावस्य घटत्वादिनावाच्यत्वाद्यभावस्यैववानिरुक्तव्याप्त्यंशे निनाशालिनः प्रतियोगितामादाय लक्षणसंभवइति
यथाश्रुतमेव सम्यगिति प्रतीमइत्याहुः। व्यापकीभूतस्य सजातीयस्येत्यादिपरित्यागेन। लघुलक्षणमाह
यत्वेति। तादृशा इति। गकनसाध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावाइत्यर्थः। अत्रापि यत्संबं
धेन साध्यव्यापकता तत्संबंधावच्छिन्नाभावानां प्रतियोगितावच्छेदकधर्मैः तत्संबंधेन यद्रूपावच्छिन्नप्रतिव्या
पकत्वमवच्छिन्नत इति पर्यवसितार्थः। तेन गगनस्पंदत्वादित्यादौ गगनत्वाद्यभावप्रतियोगितावच्छेदकैः गग
नत्वत्वादिभिः कालिकसंबंधेन स्पंदत्वादिहेतुव्यापकतावच्छेदकत्वेपि नातिव्याप्तिः। न वा वाच्यत्वादिभेद
प्रतियोगितावच्छेदकमादायैव केवलान्वयिस्थले लक्षणसंभवे प्रतियोग्यवृत्तित्वेत्यादिग्रंथाव
तारानुपपत्तिः। न च धूमत्वेन धूमाभावस्य वह्नित्वेन धूमवद्भेदस्याभावत्वात् अयं पिंडोन्यत्वाद्य
भावस्य अयं पिंडोन्यत्व लक्षणस्य रूपसंबंधेन भेदत्वावच्छिन्नाभावत्वात् प्रतियोगितावच्छेदकी

ऽत एव वह्नित्वभेदत्वादिभिर्वह्नित्वाद्यवच्छिन्नं प्रतिव्यापकतावच्छेदा धूमवान्वह्नेरित्यादावतिव्याप्तिरिति वाच्यं यत्प्रतियोगिता
काभावे स्वावच्छेदकावच्छिन्नवद्वृत्तित्वं व्यधिकरणधर्मावच्छिन्नाभावभिन्नत्वोभयाभाववत्त्वादृशप्रतियोगिता
या एकावच्छेदकधर्मस्य लक्षणघटकत्वादिति संक्षेपः॥ ७ ॥श्रीगुरुभ्यो नमः॥ ७ ॥
परे त्विति। साध्याभाववद्वृत्तित्वस्य घटत्वादिना भावमादाय व्यभिचारिण्यतिव्याप्तिरतो यावन्त इत्युक्तं। तादृशयावन्ति
दम ताभाववत्त्वेऽपि दैशिकविशेषणतयैव ग्राह्यं तेन निधूमवत्तित्वादिसामान्याभावस्यापि कालिकसंबंधेन वह्न्या
दिवृत्तित्वाद्यावत्त्वोपादानेऽपि नातिव्याप्तिस्तादृशस्य। वह्निमान्धूमाद्वाच्यं दोषत्वादित्यादावव्याप्तिः व्यधिकरण
धर्मावच्छिन्नसाध्याभाववत्संयुक्तत्वादिसमनियतप्रतियोगिताकस्य संयुक्तत्वादिसामान्याभावस्य हि तावत्त्वा
देतावत्त्वनिवेशाय इत्युक्तं। तदनुक्तावसंभवस्तु नास्ति तादात्म्यसंबंधेन सद्धेतावेव निरुक्तलक्षणगमना
त्। व्यधिकरणधर्मावच्छिन्नसाध्याभाववत्तादात्म्यप्रतियोगिकस्य व्यधिकरणधर्मावच्छिन्नाभावस्यैव वस्तु ६५

गत्या तादृशावृत्तित्वसत्त्वव्यापकप्रतियोगिताकतया तथाविधयावदभावस्यैव हेतावसत्त्वादिति धेयं। येन संबं
धेन हेतुतावत्तिमद्वृत्तयत्किंचित्त्रापि वृत्तिमत्त्वं तेनैव बोध्यमिति पाठः। तदभावस्येति तत्सामान्याभावस्य समर्थः। वा
च्यादावितिसमवेतत्वघटितजातित्वेत्यास्संबंधांतरेण यो वृत्तिमान्स्तद्वृत्तित्वमुपदर्शितं। [illegible] नाव्याप्तिः
हेतुताघटकसंबंधेन यो वृत्तिमान्स्तद्वृत्तित्वेन तादृशाभावस्य यावदंतर्गतत्वादिति भावः। अत्र वृत्तिमति
वृत्ति दैशिकविशेषणतया ग्राह्यं तेन वाच्यं घटत्वादिसाध्ये व्यधिकरणधर्मावच्छिन्नवाच्यत्वाभाववत्सम
वेतत्वस्य समनियतप्रतियोगिताकस्वसमवेतत्वसामान्याभावस्य हेतुताघटकसमवायसंबंधेन वृत्तिम
ति स्पंदादौ कालिकसंबंधेन वर्त्तमानस्य दैशिकविशेषणतया घटत्वादिहेतावसत्त्वेऽपि नाव्याप्तिः। इत्यत्रा
पीत्यपिकारेण साध्याभाववति वृत्तिरपि हेतुताघटकसंबंधेनैव ग्राह्येति व्यंजितं तेन तत्र धूमावद्
वान्यत्वत्वावच्छिन्नाभावस्यापि पूर्वोक्तद्वितीयरीत्या साध्याभाववत्त्वेन तद्वृत्तिसंबंधसामान्येन यो वृत्ति

स्तदभावस्य तद्धूमावयवासमानकालीनद्रव्यक्तेर्धूमहेतावसत्त्वेपि न वह्निमान् धूमादित्यादावव्याप्तिः। नु न। साध्यप्रति
योगिकाभावमात्रस्य प्रवेशे धूमस्य तत्तद्वह्न्यभाववद्वृत्तितया वह्निमान् धूमादित्यत्राव्याप्तिः। साध्यतावच्छेदकध
र्मावच्छिन्नाभावप्रवेशे तु गगनादेस्साध्यत्वे द्रव्यत्वादावतिव्याप्तिः। तादृशसाध्याभावस्य केवलान्वयित्वात्
एवं घ्राणग्राह्यगुणवान् प्रमेयवान् पृथिवीत्वादित्यादावव्याप्तिः। तादृशधर्मावच्छिन्नप्रतियोगिताप्रसि
द्धेरत आह। साध्याभावश्चेति। तद्वदिति। प्रकृतसाध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकोव्या
पकनिष्ठाभावोत्र साध्याभावशब्दार्थ इत्यर्थः। यथाश्रुते साध्याभावस्य प्रवेशे नासंगत्यापत्तेः। अत्रापि ये
न संबंधेन व्यापकता तत्संबंधेन तादृशरूपावच्छिन्नाभावो बोध्यः। तेन ज्ञानवानात्मत्वादित्यादौ स्वरूपसं
बंधेन साध्यव्यापकस्य प्रमेयत्वादेः कालिकसंबंधावच्छिन्नाभावाधिकरणसमवेतत्वाभावस्य स्पंदत्वा
दिनिष्ठस्य आत्मत्वादिहेतावसत्त्वेपि न क्षतिः। यत्तु साध्यतावच्छेदकसंबंधेन तादृशरूपावच्छिन्नाभावा ९६

नांविवक्षणात् ज्ञानवान्नात्मत्वादित्यादावपि नाव्याप्तिः कालिकसंबंधेन प्रमेयत्वाभावस्य साध्यताघटकसमवायसंबंधेनावच्छिन्नत्वात्
इत्थं च व्यापकतापि तेनैव संबंधेन ग्राह्या। तेन विषयतया साध्यव्यापकस्य ज्ञानादेः साध्यताघटकसमवायसंबंधेनाभाववति हेतौ वर्त्तमान
त्वेपि द्रव्यं पृथिवीत्वादित्यादौ नाव्याप्तिरिति तन्तुच्छं। वृत्तिनियामकसंबंधेन साध्यतायां तदवच्छिन्नप्रतियोगिताया असिध्यासद्धेतावव्याप्तेः।
धूमवान्वह्नेरित्यादावतिव्याप्तेश्च। व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यैव संयोगादिसंबंधावच्छिन्नाभावस्य व्याप्यवृत्तितया तद्वृत्ति
त्वाभावस्यापि व्यधिकरणधर्मावच्छिन्नस्यैव वृत्तिमद्वृत्तित्वात् प्रमेयं वाच्यत्वादित्यादौ तादृशस्यैव साध्यतायामव्याप्तेश्च। साध्यताघटकतादा
त्म्यसंबंधेन प्रमेयत्वादेरेव साध्यव्यापकतावच्छेदकतया तत्संबंधेन तदवच्छिन्नाभावाप्रसिद्धेरिति दि। कृ। वह्निमान्धूमादित्यादावव्या
प्तेः। वह्निसंयोगाभावस्यापि साध्यव्यापकतया तदभावात्मकवह्निसंयोगवद्वृत्तित्वसामान्याभावस्यैव घटादिनिष्ठस्य हेतावभावादतो
व्याप्यवृत्तित्वेनाभावो विशेषणीयः। वस्तुतस्तु निरुक्तसाध्याभावाधिकरणत्वमवच्छेद्यविशेषणतया विशेषेण प्रवेश्यं। अन्यथा द्रव्यं गु
णादित्यादौ द्रव्यत्वाभावस्य कालिकसंबंधेनाधिकरणे गुणस्य वृत्तेः द्रव्यत्वाभाववत्समवेतत्वसामान्याभावस्य ज्ञानादिनिष्ठस्य हेतावस
त्वादव्याप्त्यापत्तेः। तथा च वह्निसंयोगात्मकाभावस्य तादृशसंबंधेनाधिकरणाप्रसिध्या तन्मादायाव्याप्तेर्वारणार्थं न व्याप्यवृत्तिप
दं। परं तु रूपवान्पृथिवीत्वादित्यादौ नित्यसत्वादिना रूपाद्यभावस्यापि तादृशधर्मावच्छिन्नाभावतया तद्वत्समवेतत्वाद्यभावस्य नित्य
रूपादिनिष्ठस्य हेतावसत्वादव्याप्तिरतो व्याप्यवृत्तिपदं। न च तस्यापि व्याप्यवृत्तित्वाद्दुरुद्धरत्वादवस्थं। प्रतियोगितावच्छेदकाभावे स्वाव

च्छेदकसंबंधेन साध्यावच्छेदकधर्मावच्छिन्नवद्वृत्तित्वस्य व्यधिकरणधर्मावच्छिन्नाभावभिन्नत्वस्य च द्वयोर्व्यतिरेकः साध्यव्यापकतावच्छेदकरूपाव
च्छिन्नताद्दशप्रतियोगिताकाभावस्याप्रसिद्धत्वात् नित्यत्वादिना रूपाद्यभावस्य व्यधिकरणधर्मावच्छिन्नाभावभिन्नस्य स्वावच्छेदकीभूतनित्यत्वा
द्यवच्छिन्नवद्वृत्तित्वादेव व्युदासः। एतेन संयोगाद्यभावत्वादेः साध्यवृत्तिनिष्ठाभावप्रतियोगितावच्छेदकतया प्रतियोगिवैयधिकरण्याघटितसा
ध्यव्यापकतानवच्छेदकत्वेपि न व्याप्यवृत्तिन व्याप्यवृत्तिपदवैयर्थ्यमिति ध्येयम्। ननु वह्निमान् धूमादित्यत्र साध्यवालोकावृत्तित्वादिना आ
लोकावृत्तिसामान्याभावोपि साध्याभाववद्वृत्तित्वाभावो यावदन्तर्गतः संयोगादिसंबंधावच्छिन्नवह्निसामान्याभाववद्वृत्तित्वस्याप्यालो
कावृत्तिमद्घनिवेशेन तु। एवमपि धर्मत्वावच्छिन्नस्य भावाधिकरणीभूतमहानसवृत्तित्वादेर्महानसवृत्तित्वादिना यो भावः सोपि साध्याभा
ववद्वृत्तित्वाभावो यावदन्तर्गतः तयोर्धूमादावसत्वादसंभव इति हा आ१। तद्वृत्तित्वाभावोपीति। मिश्रलक्षणेऽवाच्यापि तत्तत्साध्याभाव
वद्वृत्तित्वनिरूपकव्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकत्वप्रवेशो आलोकावृत्तित्वाद्यवच्छिन्नाभावस्य हेतावसत्वाद्वह्निमान्धूमा
दित्यत्र अव्याप्तिरतोऽन्यथा व्याचष्टे। स्वव्यापकेति। स्वं प्रतियोगितावच्छेदकीभूतं यत् तत्तत्साध्याभाववद्वृत्तित्वं तद्व्यापकं प्रतियोगि
ताक इत्यर्थः। व्यधिकरणधर्मावच्छिन्नसाधारणसाध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकस्य व्यधिकरणधर्मावच्छिन्नाभा
वस्येव वृत्तिमद्वृत्तित्वाद्यभिचारिण्यतिव्याप्तिरत उक्तं तत्तदिति। तथा चानिरूपितवृत्तित्वाभावस्येव स्वव्यापकत्वं तत्साध्याभावव

वृत्तित्वत्वव्यापकप्रतियोगिताकत्वं यातस्य वृत्त्यादावसत्त्वान्नातिव्याप्तिरिति भावः स्वनिष्ठावृत्तित्वेन रूपेण वृत्तित्वसामान्याभावस्य व्यधि
करणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वसमनियतप्रतियोगिताकस्य हेतुत्वं तत्र स्वत्वे स्वस्मिन्न सत्त्वात् धेनुमात्रे असम्भवापत्तिरतः कल्पान्त
रमाह। तत्त्वरिति। समानाधिकरणधर्मानवच्छिन्नप्रतियोगिताकस्य यावदभावस्यैव व्यभिचारिण्यवृत्तित्वप्रसक्तत्वादिति दिक्। नत्वत्रापि निर्धूम
वृत्तित्वस्यापि सामान्यतः साध्याभाववद्वृत्तित्वातिरिक्तसमानाधिकरणधर्मानवच्छिन्नसामान्याभावमादायातिव्याप्तेर्वारणायाभ्यो
तनदित्यलं। न चैवमपि व्यधिकरणधर्मावच्छिन्नद्रव्यत्वाभाववद्वृत्तित्वत्वेन घटत्वपित्वजातित्वान्यतराभावमादाय द्रव्यं पृथिवीत्वादित्यादाव
व्याप्तिः। हेतुतावच्छेदकसंबन्धावच्छिन्नवृत्तित्वभिन्नावृत्तित्वेनापि प्रतियोगिताया विशेषणीयत्वात्। अत एव तत्र साध्याभाववद्वृत्तित्वत्वा
वच्छिन्नाभावाद् इत्यतो वाच्यं ज्ञेयत्वादित्यादावव्याप्तिः। साध्याभाववद्वृत्तित्वत्वावच्छिन्नहेतुतानवच्छेदकसंबन्धावच्छिन्नवृत्तित्वभिन्नावृत्तित्व
प्रतियोगिताकस्य घटभिन्नवृत्तित्वाभावस्याप्रसिद्धेरतो निवेशधर्मगर्भता। तेन पटत्वादिना तादृशवृत्तित्वाभावमादायैव लक्षणसंगतिः। केचि
नु यद्यपि तत्तत्साध्याभाववद्वृत्तित्वत्वावच्छिन्ना यावन्तो अभावाः इत्येव लाघवाद्धेतुमत्त्विता न तथापि वाच्यं प्रमेयादित्यादौ तादात्म्येन हेतौ जग
तएव साध्याभाववत्तादात्म्येन यातादृशतादात्म्यत्वावच्छिन्नाभावाप्रसिद्ध्या व्याप्तिरतो निवेशधर्मगर्भता। इदं च विरुद्धं घटत्वे पट
त्वाभावेन वतादृशावृत्तित्वाभावः सुलभ इत्याहुः। यत्तु वृत्तित्वत्वमपेक्ष्य गुरोर्धीत्वाभाववद्वृत्तित्वत्वस्य प्रतियोगितानवच्छेदक
तया केवलान्वयिन्यव्याप्तिरिति यत्तन्न साध्याभाववद्वृत्तित्वत्वावच्छिन्नाभावानोक्ता इति तन्तुच्छं। गुरुधर्मस्य प्रतियोगितावच्छे

छेदकत्वमाचष्टे लक्षणाकरणात् । अन्यथा ऽ एतत्कल्पे वृत्तिमद्वृत्तिपदद्वैयर्थ्यापत्तेः । वृत्तित्वमात्रस्य तत्र साध्याभाववद्वृत्तित्वातिरिक्तस-
मानाधिकरणधर्मतयैव तदवच्छिन्नाभावमादाया ऽ व्याप्त्यसंभवात् । किं चैवं गुरुधर्मस्यानवच्छेदकत्वे तद्घटभिन्नं द्रव्यत्वादित्यादावतिव्या-
प्तिरपि स्यात् तत्र तद्घटवृत्तित्वत्वापेक्षया गुरुणा तद्घटभेदाभाववद्वृत्तित्वेनावच्छिन्नाभावाप्रसिद्धेः तद्घटवृत्तित्वस्य च साध्याभाववद्वृ-
त्तित्वातिरिक्तसमानाधिकरणधर्मतया तदवच्छिन्नाभावस्य लक्षणाघटकत्वात् । एवं स्नेहशून्यं द्रव्यत्वादित्यादौ स्नेहशून्यता-
भाववद्वृत्तित्वादेर्जलवृत्तित्वापेक्षया लघुत्वमनुसृत्याह । वृत्तित्वविनावेति । साध्याभाववद्वृत्तित्वविनावेति पाठे साध्याभावे
वत्पदं गुरुत्वेन तदवच्छिन्नाभावासिध्या ऽ व्याप्तिवारणायेति दिक् । यस्य कस्य चित् सामानाधिकरण्यमव्यापकमतः तत्प्रतियो-
गितासमानाधिकरणत्वनिवेशापेक्षया ऽ संपातायातं । यद्यपि वृत्तित्वत्वविशिष्टधर्मानवच्छिन्नप्रतियोगिताकस्य धूमत्वादेः सामा-
न्याभावस्य घटान्यत्वाद्यभावस्य च हेतावसत्वाद् वह्निमान्धूमादित्यादौ सर्वत्रासंभवः । तादृशधर्मानवच्छिन्नवृत्तित्वनिष्ठप्रतियो-
गिताकाभावविवक्षणेपि घटभेदत्वेन घटभेदनिर्वर्तिवृत्तित्वान्यतराभावस्य तादृशहेतावसत्वात् । तथापि एवंवदतापि
कल्पे वृत्तित्वविशिष्टवृत्तित्वेनापि प्रतियोगित्वं विशेषणीयमिति स्यदोषः । स्वन्यूनवृत्तिधर्मानवच्छिन्नवृत्तित्वनिष्ठप्रतियोगि-
तायाः एव तादृशावृत्तित्वत्वातिरिक्तवृत्तित्वनिष्ठधर्मानवच्छिन्नत्वं विवक्षितमित्यपि कश्चित् । वृत्तित्वत्वतिनाधर्मेणावे-

तिपाठे तु धूमत्वाद्यभावमादायासंभवभयादेव धर्मेणेति कल्यां तद्देहेतुरवगतधाच धूमवत्त्वघटभेदत्वादेः तादृशावृत्तित्वात्तिरिक्त धर्मत्वादेव
तद्वच्छिन्नाभावमादायनासंभवः। वाच्यं प्रमेयत्वादिस्वादौ तु तादृशेन हेतौ विरुद्धघटत्वपटत्वाभ्यामप्रतियोगिगगनादिनावावृत्तित्वाभावमादाय
लक्षणसमन्वय इति ध्येयं। स्वव्यापकतत्तत्साध्याभाववद्वृत्तित्वे यस्य व्याप्तिमाह। आलोकावृत्तित्वेनेति। निर्वह्निवृत्तित्वस्यापि प्रतियोगिता
यां तत्तत्साध्याभाववद्वृत्तित्वव्यापकत्वप्रदर्शनार्थं। न च स्वव्यापकवृत्तित्वकेत्युक्तौ आलोकवृत्तित्वत्वावच्छिन्नाभावस्य वारणसंभ
वात्प्रतियोगिताया व्यापकत्वादिविशिष्टतत्तत्साध्याभाववत्त्वविशेषणं व्यर्थ इति वाच्यं आलोकावृत्तिवृत्तित्वाभावमादायाव्याप्तेर्वारणार्थं तस्या
वश्यकत्वात्। स्वसमानाधिकरणात्यंताभावाप्रतियोगितत्तत्साध्याभाववद्वृत्तित्वत्वाश्रयनिष्ठात्यंताभावप्रतियोगि प्रतियोगि
ताकत्वरूपपर्यवसितार्थे तत्तत्साध्याभाववतः सकृदेव निविष्टतया वैयर्थ्यशंकानवकाशात्वेति भावः। तत्तत्साध्याभाववद्वृत्तित्व
व्यापकप्रतियोगितेत्यस्य फलमाह। यत्स्वेत्यादिना। घटत्वादेः साध्यव्यापकतावच्छेदकत्वाभावात्तदवच्छिन्नवत्त्वाभावस्य लक्ष
णाघटकत्वादुक्तं। इंधनत्वेति। इंधनत्वावच्छिन्नसामान्याभावस्य महानसादावसत्त्वात्तमादाय पक्षवृत्तिविरहादाह वन्यभावेति
तादृशावृत्तित्वव्यापकप्रतियोगिताकत्वस्यानुक्तावसंभवएव स्यात्। न तु वह्निमान् धूमादित्यत्रावेव्याप्तिमात्रं प्रमेय
मात्रस्य हेतुतास्थलेपि तत्तत्प्रमेयनिष्ठावृत्तित्वाभावस्य प्रमेयांतरवृत्तेस्तत्प्रमेयविरहादित्यावेदयितुं सर्वसाधनसाधा
रण्येनाह। स्वनिष्ठेति। स्वनिष्ठं यत्साध्याभाववद्वृत्तित्वं तत्सामान्याभावस्येत्यर्थः। अत्र घटत्वादौ साध्ये स्वीयविशेषणतया

घटान्यत्वादिहेतावतिव्याप्तिः साधनस्यैव हेतुतावच्छेदकसंबंधेन वृत्तिमत्तया तन्निष्ठस्यैव यावदभावस्य हेतौ सत्वात् । न चैतस्य विरुद्धत्वात् साध्यसमा
नाधिकरणत्वेन हेतुविशेषणादेव नातिव्याप्तिरिति वाच्यं । तथापि द्रव्यत्वादौ साध्ये स्वीयसमवायादिना सत्वादिहेतावतिव्याप्तिः । ताद
ृशसंबंधेन हेतौ वृत्तिमत्तया तन्निष्ठयावदभावस्य साध्यसामानाधिकरण्यस्य च हेतौ सत्वात् । एवं महाकालान्यो घटादित्वैका
लिकसंबंधेन हेतावतिव्याप्तिः । तत्र हेतुतावच्छेदककालिकसंबंधेन महाकालवृत्तेः । तेन संबंधेन तद्वृत्तित्वासंभवात् । सामानाधिक
रण्यस्य चाव्याप्यवृत्तित्वात् । अन्यथा घटादिहेतावपि खंडकालावच्छेदेन महाकालवृत्तित्वाभावसत्वात् उक्तातिव्याप्तितादवस्थ्यात् । एत
वं द्रव्यत्वादेः साध्यतायामवृत्तिगगनादिहेतावतिव्याप्तिः । विशिष्टसत्तायामव्याप्तिश्च द्रव्यान्यस्मिन् गुणादौ विशिष्टसत्तायाः वृत्तित्वा
दितिवदंति । यदि च वृत्तिमद्भेदो यो यावंतः साध्याभाववद्वृत्तित्वाभावात् तद्भेदावच्छिन्नाधिकरणतासामान्यकधर्मवत्वमिति वि
वक्ष्यते तदा नैतेषामेकोपि दोषः । परमाद्यातिवृत्तिमद्भूतं यद्रूत्यादौ सर्वत्र दैशिकविशेषणतासंबंधेनैव वृत्तेः विवक्षणीय
त्वात् । अन्यथा अधिकरणतामात्रस्यैव संयोगादिसंबंधेनावर्तमानत्वात् धूमवान्वन्हेरित्यादावतिव्याप्तिप्रसंगादि
ति ध्येयं ॥ ॥श्रीगुरुचरणारविंदाभ्यां नमः॥ ॥अन्योन्येत्यादि । साध्याभाववदधिकरणवृत्तित्व
स्य घटत्वादिना अभावमदाय अव्याप्तिवारिण्यतिव्याप्तिरतो यावंत इत्युक्तं । तथा च तादृशावच्छिन्नसामान्याभावस्यैव

हेतावसत्त्वान्नातिव्याप्तिः। न च तादृशवृत्तित्वावच्छिन्नाभावत्वोक्तावपि तादृशाभावप्रसिद्धिः संभवतीति वाच्यं। तथा च तादृश
वृत्तित्वे तेन घटादेरभावमादायातिव्याप्तितादवस्थ्यात्। तादृशवृत्तित्वस्य गुरुतया तदवच्छिन्नाभावाप्रसिद्धेः [illegible] स्वाऽ
तत्त्व तादृशवृत्तित्वसामान्याभावत्वमपि न विवक्षितं केवलान्वयिन्यव्याप्यवृत्त्यत्यन्ताभावकूटाधिकरणवृत्तित्वसामान्याभावस्य हेता
वसत्त्वादिति भावः। इत्थमपि वाच्यत्वाभावकूटाधिकरणवृत्तित्वसामान्याभावस्यैव यावदंतर्गतस्पष्टे पत्वादिहेतावसत्वादिदं वाच्यं से
यत्वादित्यादावव्याप्तिरतो वृत्तिमद्भिन्नयदूरूकं। तथा चैतत्स्ववृत्तिमद्वृत्तित्वात्वानिरुक्तयावदंतर्गतत्वं। किंतु घटत्वादिना
तादृशं